उपोद्घातः ।

" विनिहतदोषः सततं भव्यव्रजवारिजातकृतबोधः ।
गोभिः सकलपदार्थप्रकटयिता जयति वीररविः ॥"

अध्यात्मकल्पद्रुमाभिधमिदं ग्रन्थरत्नमार्हतदर्शनप्रमुखतत्त्वप्रतिपादकत्वात् प्रसादगुणशालित्वाच्च शतार्थिकश्रीसोमप्रभसूरीणां सूक्तिमुक्तावल्याः शोभामनुहरति । उपदेशरत्नाकरनामा बृहत्कायोऽन्योऽपि ग्रन्थो मागधीभाषायां व्यरच्येतत्कर्त्रा ।

ग्रन्थस्यास्य निर्माता तपागच्छनायकः श्रीमुनिसुन्दरसूरिः श्रीविक्रमाब्दे १४३६ स्वजन्मना महीमण्डलं मण्डयामासेति श्रूयते । षड्वर्षदेशीय एव पूर्वभवाचरितशुभकर्मसंस्कारपरिणामादुत्पन्नवैराग्यः श्रमणदीक्षामग्रहीत् । देहावसान च १५०३ वत्सरे जातम् ।

अध्यात्मकल्पद्रुमस्योपरि श्रीरत्नचन्द्रगणिविद्यासागरगणिश्रीधनविजयगणिप्रभृतीनां टीकाः सन्तीति ज्ञायते परन्तु तासां मध्यात् श्रीधनविजयगणिविरचिता अधिरोहणी एव मया प्राप्ता । अस्ति च "अध्यात्मकल्पद्रुमशास्त्रभावफलाप्तयेऽसावधिरोहिणीव । व्याख्या पदस्थानसुखाधिगम्या * * * ॥" अत एव तत्सारभूता विषमपदटिप्पणी संयोजिता मूलेन सह ।

टीकाकर्तृसमयनिर्णयविषये टीकान्तिमलेखे "तपागच्छनायकश्रीमुनिसुन्दरसूरिनिर्मितस्याध्यात्मकल्पद्रुमस्य सकलशास्त्रारविन्दप्रद्योतनमहोपाध्यायश्रीकल्याणविजयगणिशिष्योपाध्यायश्रीधनविजयगणिविरचितायामधिरोहणीटीकायां साम्यसर्वस्वनाम्नी षोडशी पदपद्धतिः" इत्येव लभ्यते ।

जैनाचार्यश्रीकमलविजयसूरिभिः कृपया दत्तस्य हस्तलिखितस्य सटीकस्य पुस्तकस्यानुरोधेन प्रकरणरत्नाकरनाम्नि जैनधर्मग्रन्थसङ्ग्रहे मुद्रितस्य आदर्शपुस्तकस्य चाधारेण ग्रन्थरत्नस्यास्य संशोधनमकारि यथामति । "श्लोकोवरं परमतत्वपथप्रकाशी न ग्रन्थकोटिपठनं जनरञ्जनाय । सञ्जीवनीति वरमौषधमेकमेव व्यर्थश्रमप्रजननो न तु मूलभारः ॥" इति हृदयप्रदीपोक्तिं मनसि निधाय शास्त्रसारभूतस्यास्य पठनपाठनाभ्यां ममोत्साहं वर्द्धयिष्यन्ति कृपालवः साधव इत्यहमाशंसे । उक्तं हि कविकुलगुरुणा "क्लेशः फलेन हि पुनर्नवतां विधत्ते" इति

सज्जनसेवाभिलाषी,

शिवरामः ।

अनुक्रमणिका.

उपोद्घातः ....

श्रीवीतरागस्तुतिः ....

मङ्गलाचरणम् .... आरंभश्लोकांकः १

शान्तरसमाहात्म्यम् २

शास्त्रोपदेशसङ्ग्रहः ३

समताधिकारः ५

स्त्रीममत्वमोचनाधिकारः ३०

अपत्यममत्वमोचनाधिकारः ३८

धनममत्वमोचनाधिकारः ४२

देहममत्वमोचनाधिकारः.... .... ४९

विषयप्रमादत्यागाधिकारः ५७

कषायत्यागाधिकारः ६६

शास्त्रगुणाधिकारः ८७

चित्तदमनाधिकारः १०३

वैराग्योपदेशाधिकारः १२०

धर्मशुद्ध्यधिकारः १४६

गुरुदेवतत्वाधिकारः १६०

यतिशिक्षोपदेशाधिकारः १७७

मिथ्यात्वादिनिरोधोपदेशाधिकारः २३३

शुभवृत्तिशिक्षोपदेशाधिकारः २५५

साम्यसर्वस्वाधिकारः २६५

—२७२

परिशिष्ट.

परिशिष्टम् .... पृष्ठानि ४५—७

श्रीरत्नाकरसूरिविरचिता

रत्नाकरपञ्चविंशतिका ।



(श्रीवीतरागस्तुतिः ।)

श्रेयःश्रियां मंगलकेलिसद्म नरेन्द्रदेवेन्द्रनतांघ्रिपद्म ।
सर्वज्ञ सर्वातिशयप्रधान[1] चिरं जय ज्ञानकलानिधान ॥ १ ॥
जगत्त्रयाधार कृपावतार दुर्वारसंसारविकारवैद्य ।
श्रीवीतराग त्वयि मुग्धभावाद् विज्ञ प्रभो विज्ञपयामि किंचित्[2] ॥ २ ॥
किं बाललीलाकलितो न बालः पित्रोः पुरो जल्पति निर्विकल्पः[3] ।
तथा यथार्थं कथयामि नाथ निजाशयं सानुशयस्तवाग्रे[4] ॥ ३ ॥
दत्तं न दानं परिशीलितं च न शालि शीलं न तपोऽभितप्तम् ।
शुभो न भावोऽप्यभवद्भवेऽस्मिन् विभो मया भ्रांतमहो मुधैव ॥ ४ ॥
दग्धोऽग्निना क्रोधमयेन दृष्टो दुष्टेन लोभाख्यमहोरगेण ।
ग्रस्तोऽभिमानाजगरेण मायाजालेन बद्धोऽस्मि कथं भजे त्वाम् ॥ ५ ॥
कृतं मयाऽमुत्र हितं न चेह लोकेऽपि लोकेश सुखं न मेऽभूत् ।
अस्मादृशां केवलमेव जन्म जिनेश जज्ञे भवपूरणाय ॥ ६ ॥
मन्ये मनो यन्न मनोज्ञवृत्त त्वदास्यपीयूषमयूखलाभात् ।
द्रुतं महानंदरसं कठोरमस्मादृशां देव तदश्मतोऽपि ॥ ७ ॥
त्वत्तः सुदुष्प्रापमिदं मयाप्तं रत्नत्रयं[5] भूरिभवभ्रमेण ।
प्रमादनिद्रावशतो गतं तत् कस्याग्रतो नायक पूत्करोमि[6] ॥ ८ ॥
वैराग्यरंगः परवंचनाय धर्मोपदेशो जनरंजनाय ।
वादाय विद्याध्ययनं च मेऽभूत् कियद् ब्रुवे हास्यकरं स्वमीश ॥ ९ ॥
परापवादेन मुखं सदोषं नेत्रं परस्त्रीजनवीक्षणेन ।
चेतः परापायविचिंतनेन कृतं भविष्यामि कथं विभोऽहम् ॥ १० ॥

---

१ ज्ञानवागपायागमपूजातिशयश्रेष्ठ । २ विगतशंकः । वक्तव्यावक्तव्यविवेकशून्य इत्यर्थः । ३ ज्ञानदर्शनचारित्ररूपम् । ४ दुःखं निवेदयामि ।

विडंबितं यत्स्मरघस्मरार्तिदशावशात् स्वं विषयांधलेन[1] ।
प्रकाशितं तद्भवतो ह्रियैव सर्वज्ञ सर्वं स्वयमेव वेत्सि ॥ ११ ॥
ध्वस्तोऽन्यमंत्रैः परमेष्टिमंत्रः कुशास्त्रवाक्यैर्निहतागमोक्तिः ।
कर्तुं वृथा कर्म कुदेव संगाद् अवांछि हीं नाथ मतिभ्रमो मे ॥ १२ ॥
विमुच्य दृग्लक्ष्यगतं भवंतं ध्याता मया मूढधिया हृदंतः ।
कटाक्षवक्षोजगभीरनाभीकटीतटीयाः सुदृशां विलासाः ॥ १३ ॥
लोलेक्षणावक्त्रनिरीक्षणेन यो मानसे रागलवो विलग्नः ।
न शुद्धसिद्धांतपयोधिमध्ये धौतोऽप्यगात्तारक कारणं किम् ॥ १४ ॥
अंगं न चेंगं[2] न गणो गुणानां न निर्मलः कोऽपि कलाविलासः ।
स्फुरत्प्रधानप्रभुता च कापि तथाप्यहंकारकदर्थितोऽहम् ॥ १५ ॥
आयुर्गलत्याशु न पापबुद्धिर्गतं वयो नो विषयाभिलाषः ।
यत्नश्च भैषज्यविधौ न धर्मे स्वामिन् महामोहविडंबना मे ॥ १६ ॥
नात्मा न पुण्यं न भवो न पापं मया विटानां कटुगीरपीयं ।
अधारि कर्णे त्वयि केवलार्के परिस्फुटे सत्यपि देव धिङ् माम् ॥ १७ ॥
न देवपूजा न च पात्रपूजा न श्राद्धधर्मश्च न साधुधर्मः ।
लब्ध्वापि मानुष्यमिदं समस्तं कृतं मयारण्यविलापतुल्यम् ॥ १८ ॥
चक्रे मयासत्स्वपि कामधेनुकल्पद्रुचिंतामणिषु स्पृहार्तिः ।
न जैनधर्मे स्फुटशर्मदेऽपि जिनेश मे पश्य विमूढभावम् ॥ १९ ॥
सद्भोगलीला न च रोगकीला[3] धनागमो नो निधनागमश्च ।
दारा न कारा नरकस्य चित्ते व्यचिंति नित्यं ममैएऽधमेन[4] ॥ २० ॥

---

१ विद्युत्पत्रपीतान्धाल्लः । ८.२.१७३ एभ्यः स्वार्थे लो वा भवति । अंधलो । अंधो । इति प्राकृतसिद्धहेमचन्द्रे श्रीहेमचन्द्रसूरिः । २ पञ्चपरमेष्टिमंत्रः—ओम् नमो अरिहंताणं । नमो सिद्धाणं । नमो आयरियाण । नमो उवज्झायाण । नमो साहूणं । ३ चारु । चेंगं चारु इति देशीनाममालायां । ४ श्रद्धया युक्तः श्राद्धः श्रावक इत्यर्थस्तस्य धर्मः । प्राणातिपातविरमणव्रत मृषावाद वि० अदत्तादान वि० मैथुन वि० अनर्थदण्ड वि० परिग्रहपरिमाणव्रत दिशापरिमाणव्रत भोगोपभोगपरिमाणव्रत सामायिकव्रत देशावकाशिकव्रत पोषधव्रत अतिथिसंविभागव्रतलक्षणो धर्मः । ५ क्षान्तिमार्दवार्जवलोभपरित्यागसंयमसत्यशौचाकिञ्चनताब्रह्मचर्यलक्षणो धर्मः । ६ कीलोऽभितापः । कीलः कीला प्रकीर्तिता इति द्विरूपकोषे पुरुषोत्तमदेवः । ७ ममए इति अस्मदस्तृतीयैकवचनस्य रूपमिति आचार्यहेमचन्द्रः । मयकाधमेन इति आदर्शपुस्तकस्थः पाठोऽसमीचीनः । स तु लेखकप्रमादज इति भाति । ममएऽधमेन

स्थितं न साधोर्हृदि साधुवृत्तात् परोपकारान्न यशोऽर्जितं च ।
कृतं न तीर्थोद्धरणादिकृत्यं मया मुधा हारितमेव जन्म ॥ २१ ॥

वैराग्यरंगो न गुरूदितेषु न दुर्जनानां वचनेषु शांतिः ।
नाध्यात्मलेशो मम कोऽपि देव तार्यः कथंकारमयं भवाब्धिः[1] ॥ २२ ॥

पूर्वे[2] भवेऽकारि मया न पुण्यमागामिजन्मन्यपि नो करिष्ये ।
यदीदृशोऽहं मम तेन नष्टा भूतोद्भवद्भाविभवत्रयीश[3] ॥ २३ ॥

किं वा मुधाहं बहुधा सुधामुक्पूज्य त्वदग्रे चरितं स्वकीयं ।
जल्पामि यस्मात् त्रिजगत्स्वरूपनिरूपकस्त्वं कियदेतदत्र ॥ २४ ॥

दीनोद्धार धुरंधरस्त्वदपरो नास्ते मदन्यः कृपा-
पात्रं नात्र जने जिनेश्वर तथाप्येतां न याचे श्रियं ।
किं त्वर्हन्निदमेव केवलमहो सद्बोधिरत्नं शिव-
श्रीरत्नाकर मंगलैकनिलय श्रेयस्करं प्रार्थये ॥ २५ ॥

इत्यस्य स्थाने मयकाधमेन इति पाठे गृहीते "छगलमपनयतः क्रमेलकप्रवेश"न्यायो दुर्वार एव । "व्यचिन्ति नित्य हि मयाधमेन" इति पाठे सर्वमनवद्यम् ।

१ "धर्माख्याने श्मशाने च रोगिणां या मति र्भवेत् । यदि सा निश्चला बुद्धिः को न मुच्येत बन्धनात् ॥" २ पूर्वस्मिन् । ३ भूतवर्तमानभविष्यज्जन्मत्रयी ।

श्रीमुनिसुन्दरसूरिविरचितः

अध्यात्मकल्पद्रुमः ।

(अधिरोहणीटिप्पणीसहितः)

मङ्गलाचरणम् ।

जयेश्रीरान्तरारीणां लेभे येन प्रशान्तितः ।
तं श्रीवीरंजिनं नत्वा रसः शान्तो विभाव्यते ॥ १ ॥

शान्तरसमाहात्म्यम् ।

सर्वमङ्गलनिधौ हृदि यस्मिन् सङ्गते निरुपमं सुखमेति ।
मुक्तिशर्म च वशीभवति द्राक् तं बुधा भजत शान्तरसेन्द्रम् ॥ २ ॥

शास्त्रोपदेशसङ्ग्रहः ।

समतैकलीनचित्तो ललनापत्यस्वदेहममतामुक् ।
विषयकषायाद्यवशः शास्त्रंगुणैर्दमितचेतस्कः ॥ ३ ॥

---

१ अथायं श्रीमान् शान्तनामा रसाधिराजः सकलागमादिसुशास्त्राणवोपनिषद्भूतसुधारसायमान ऐहिकामुष्मिकानन्तानन्दसन्दोहसाधनतया पारमार्थिकोपदेशतया सर्वरससारभूतत्वात् शान्तरसभावनात्माध्यात्मकल्पद्रुमाभिधानग्रन्थान्तरग्रथननिपुणेन पद्यसन्दर्भेण भाव्यते इति पीठिकाग्रन्थो मूले संनिवेशितो दृश्यते । २ मङ्गलार्थक पदमिदम् । "ये देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥" "मो भूमिस्त्रिगुरुः श्रियं दिशति, यो वृद्धि जल चादिलः ।" इति गणशुद्धिरप्यस्ति । ३ कामक्रोधमानमदहर्षलोभमलक्षणवैरिणाम् । ४ श्रिया अष्टमहाप्रातिहार्यरूपया चतुस्त्रिंशदतिशयरूपया वा उपलक्षितः । विशेषेण ईरयति क्षपणाय प्रेरयति अष्टकर्माणि इति वीरः । यदुक्तम्—"विदारयति यत् कर्म तपसा च विराजते । तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृतः ॥" जयति मारमिति जिनस्तम् । ५ उपदेशादिना परिशीलनालक्षणविभावनविषयीक्रियते । ६ समता रागद्वेषराहित्यम् । समताद्वारं, ललानाममतामोचनद्वारं, अपत्यममतामोचनद्वारं, धनममतामोचनद्वारं, देहम-

वैराग्यशुद्धधर्मा देवादिसतत्वविद्विरतिधारी ।
संवरवान् शुभवृतिः साम्यरहस्यं भज शिवार्थिन् ॥ ४ ॥
[युग्मकम्]

समताधिकारः ।

चित्तवालक मा त्याक्षीरजसं भावनोपधीः ।
यत्त्वां दुर्ध्यानभूता न च्छलयन्ति च्छलान्विषः ॥ ५ ॥
यदिन्द्रियार्थैः सकलैः सुखं स्यान्नरेन्द्रचक्रित्रिदशाधिपानाम् ।
तद्विन्दवत्येवं पुरो हि साम्यसुधाम्बुधेस्तेन तमाद्रियस्व ॥ ६ ॥
अदृष्टवैचित्र्यवशाज्जगज्जने विचित्रकर्माशयवाग्विसंस्थुले ।

मतामोचनद्वारं, विषयत्यागद्वारं, कषायत्यागद्वारं, शास्त्रद्वारं, चित्तदमनद्वारं, वैराग्यद्वारं, शुद्धधर्मद्वारं, देवतत्वद्वारं, विरतिद्वारं, संवरद्वारं, शुभवृत्तिद्वारं, साम्यरहस्यद्वारमेति षोडशोपदेशद्वाराणि । ७ ललना च अपत्यं च स्वं (हिरण्यादि द्रव्यम्) च देहश्च ललनापत्यस्वदेहास्तेषु ममता ललनापत्यस्वदेहममता । "द्वद्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते ।" तां मुञ्चतीति ममतामुक् । उपपदसमासः । ८ विषयाः (शब्दरूपरसगन्धाख्याः) कषायाः (क्रोधमानमदलोभाः) च ते आदौ येषां ते । तेषामवशः । ९ शास्त्ररूपैर्गुणैः रज्जुभिः । शास्त्रोदितैर्गुणैः शुभाचरणैश्च ।

१ देवादीनां देवगुरुधर्माणां सतत्वं स्वरूपं वेत्ति इति देवादिसतत्ववित् । २ विरतिं सर्वसावद्ययोगनिवृत्तिं धरतीति विरतिधारी । ३ संवरो मिथ्यात्वादिनिरोधोऽस्त्यस्येति संवरवान् । जीवः, अजीवः, पुण्यं, पापं, आस्रवः, संवरः, निर्जरा, बन्धः, मोक्षश्चेति नव तत्वानि जैनागमे । ४ शुभा पुण्यानुबन्धिनी वृत्तिरावश्यकादिषु प्रवृत्तिर्यस्येति शुभवृत्तिः । ५ भाव्यते वास्यते वैराग्येणात्मा याभिस्ता भावनाः । "साम्यं स्यान्निर्ममत्वेन तत्कृते भावनाः श्रयेत् । अनित्यतामशरणं भवमेकत्वमन्यताम् ॥ अशौचमास्रवविधिं संवरं कर्मनिर्जरां । धर्मस्याख्यातृतां लोकं बोधिदुर्लभतां बोधिभावनाम् ॥" ६ आर्तरौद्रध्यानान्येव दुष्टव्यन्तरविशेषा इलक्षरार्थः । भावार्थस्तु चित्तस्य गम्यागम्यकार्याकार्यहेयोपादेयपरिज्ञानविकलत्वेन बालकरूपता । भावनायाश्च स्थैर्यधैर्यार्याद्यापादकत्वेन ओषधिरूपता । दुर्ध्यानानाञ्च पारवश्यापादकत्वेन दौर्गत्योत्पादकत्वेनोन्मादादिजनकत्वेन च भूतरूपता । ७ चक्री—चक्रवर्ती । ८ बिन्दुतुल्यं भवति । विशेषणसंगत एवकारोऽयोगं व्यवच्छिनत्ति यथा शंखः पाण्डर एव । विशेष्यसंगत एवकारोऽन्ययोगं व्यवच्छिनत्ति यथा पार्थ एव धनुर्धरः । क्रियासंगत एवकारोऽत्यन्तायोगं व्यवच्छिनत्ति यथा नीलं सरोजं भवत्येव । १० कर्माणि कायव्यापाराः, आशयाश्च मनोव्यापाराः, वाचश्च वाग्व्यापारास्तैरस्थे ।

उदासवृत्तिस्थितचित्तवृत्तयः सुखं भजन्ते[2] यतयः क्षतार्तयः ॥ ७ ॥
विश्वजन्तुषु यदि क्षणमेकं साम्यतो भजसि मानस मैत्रीम् ।
तत्सुखं परममत्र परत्राप्यश्नुषे न यदभूत्तव जातु ॥ ८ ॥
न यस्य मित्रं न च कोऽपि शत्रुर्निजः परो वापि न कश्चनास्ते ।
न चेन्द्रियार्थेषु रमेत चेतः कषायमुक्तं परमः स योगी ॥ ९ ॥
भजस्व मैत्रीं जगदंगिराशिषु प्रमोदमात्मन् गुणिषु त्वशेषतः ।
भवार्तिदीनेषु कृपारसं सदाप्युदासवृत्तिं खलु निर्गुणेष्वपि ॥ १० ॥
मैत्री परस्मिन् हितधीः समग्रे भवेत् प्रमोदो गुणपक्षपातः ।
कृपा भवार्ते प्रतिकर्तुमीहोपेक्षा च माध्यस्थ्यमवार्यदोषे[3] ॥ ११ ॥
चेतनेतरगतेष्वखिलेषु स्पर्शरूपरवगन्धरसेषु ।
साम्यमेष्यति यदा तव चेतः पाणिगं शिवसुखं हि तदात्मन् ॥ १२ ॥
के गुणास्तव यतः स्तुतिमिच्छस्यद्भुतं किमकृथा मदवान् यत् ।
कैर्गता नरकभीः सुकृतैस्ते किं जितः पितृपतिर्यदचिन्तः ॥ १३ ॥
गुणस्तवैर्यो गुणिनां परेषामाक्रोशैर्निन्दादिभिरात्मनश्च ।
मनः समं शीलति मोदते वा खिद्येत च व्यत्ययतः स वेत्ता ॥ १४ ॥
न वेत्सि शत्रून् सुहृदश्च नैव हितंहिते स्वं न परं च जन्तो ।
दुःखं द्विषन् वाञ्छसि शर्म चैतन्निदानमूढः कथमाप्स्यसीष्टं ॥ १५ ॥

---

१ माध्यस्थ्यम् । २ श्रयन्ते इति पाठान्तरम् । ३ परहितचिन्ता मैत्री परदुःखविनाशिनी तथा करुणा । परसुखतुष्टिर्मुदिता परदोषोपेक्षणमुपेक्षा ॥ इति तुर्यषोडशके श्रीहरिभद्रसूरिः ।

मा कार्षीत् कोऽपि पापानि मा भूत् कोऽपि च दुःखितः ।
मुच्यतां जगदप्येषा मतिर्मैत्री निगद्यते ॥ १ ॥
अपास्ताशेषदोषाणां वस्तुतत्त्वावलोकिनाम् । गुणेषु पक्षपातो यः स प्रमोदः प्रकीर्तितः २
दीनेष्वार्तेषु भीतेषु याचमानेषु जीवित । प्रतीकारपराबुद्धिः कारुण्यमभिधीयते ॥ ३ ॥
क्रूरकर्मसु निःशकं देवतागुरुनिन्दिषु । आत्मशंसिषु योपेक्षा तन्माध्यस्थ्यमुदीरितम् ॥४॥
इति योगशास्त्रे श्रीहेमचन्द्रसूरिः ।
इद श्लोकपंचकं मूले संनिवेशितं दृश्यते ।

४ चेतनाचेतनगतेषु सर्वेष्विष्टानिष्टेषु । ५ गालिप्रदानदोषोद्भावनप्रमुखैः । ६ करोति । ७ हितं आयतिसुखदायि । अहितं आयतिदुःखदायि ।

चापल्यमायानृतवञ्चिका स्त्री संस्कारमोहान्नरकाय भुक्ता ॥ ३६ ॥

निर्भूमिर्विषकन्दली गतदरी व्याघ्री निराह्नो महा-
व्याधिर्मृत्युरकारणश्च ललनाऽनभ्रा च वज्राशनिः ।
बन्धुस्नेहविघातसाहसमृषावादादिसन्तापभृः
प्रत्यक्षापि च राक्षसीति विदुषैः ख्याताऽऽगमे त्यज्यताम् ॥३७॥

अपत्यममत्वमोचनाधिकारः ।

मा भूरपत्यान्यवलोकमानो मुदाकुलो मोहनृपारिणा यत् ।
चिक्षिप्सया नारकचारकेऽसिं दृढं निबद्धो निगडैरमीभिः ॥ ३८ ॥

आजीवितं जीव भवान्तरेऽपि वा शल्यान्यपत्यानि न वेत्सि किं हृदि ।
चलाचलैर्यैर्विविधार्तिदानतोऽनिशं निहन्येत समाधिरात्मनः ॥ ३९ ॥

कुक्षौ युवत्याः कृमयो विचित्रा अप्यन्नशुक्रप्रभवा भवन्ति ।
न तेषु तस्या न हि तत्पतेश्च रागस्ततोऽयं किमपत्यकेषु ॥ ४० ॥

त्राणाशक्तेरापदि संबन्धानन्यतो मिथोंऽगवताम् ।
सन्देहाच्चापकृतेर्माऽपत्येषु स्निहो जीव ॥ ४१ ॥

धनममत्वमोचनाधिकारः ।

याः सुखोपकृतिकृत्वधिया त्वं मेलयन्नसि रमा ममताभाक् ।
पाप्मनोऽधिकरणत्वत एता हेतवो ददति संसृतिपातम् ॥ ४२ ॥

यानि द्विषामप्युपकारकाणि सर्पेन्दुरादिष्वपि यैर्गतिश्च ।
शक्यां च नापन्मरणामयाद्या हन्तुं धनेष्वेषु कं एव मोहः ॥ ४३ ॥

ममत्वमात्रेण मनःप्रसादसुखं धनैरल्पकमल्पकालं ।
आरम्भपापैः सुचिरं तु दुःखं स्याद्दुर्गतौ दारुणमित्यवेहि ॥ ४४ ॥

---

१ अनादिभवानुभूतविषयादिस्मृतिः संस्कारः । २ विषवल्लरी । ३ विद्युत् । "वज्राशनिं विदुर्वज्रम्" इति त्रिकाण्डशेषः । ४ निजगुणतः प्राप्तनानाभिधानैः । ५ स्त्रिन् इति पाठान्तरम् । ६ चपलैः । ७ चित्तस्वास्थ्यम् । ८ सञ्चयीकुर्वन् । ९ अत्र किंशब्दः कुत्सावाची । १० चित्तप्रसन्नतालक्षणं सौख्यम् । ११ द्रव्यार्जनार्थं षट्कायायुपमर्दजनितदुष्कृतैः । १२ नरकादिगतौ ।

द्रव्यस्तवात्मा[1] धनसाधनो न धर्मोऽपि[2] सारम्भतयातिशुद्धः ।
निःसंगतात्मा[3] त्वतिशुद्धयोगान्मुक्तिश्रियं यच्छति तद्भवेऽपि ॥ ४५ ॥
क्षेत्रेवस्तुधनधान्यगवाश्वैर्मेलितैः[4] सनिधिभिस्तनुभाजाम्[5] ।
क्लेशपापनरकाभ्यधिकैः[6] स्यात् को गुणो यदि[7] न धर्मनियोगः ॥ ४६ ॥

आरम्भैर्भरितो[8] निमज्जति यतः प्राणी भवाम्भोनिधा-
वीहन्ते कुनृपादयश्च पुरुषं[9] येन[10] च्छलाद्बाधितुम् ।
चिन्ताव्याकुलताकृतेश्च[11] हरते यो धर्मकर्मस्मृतिं
विज्ञा भूरिपरिग्रहं त्यजत तं भोग्यं परैः प्रायशः ॥ ४७ ॥

क्षेत्रेपु[12] नो वपसि यत्सदपि स्वमेत-
द्घातासि तत् परभवे किमिदं गृहीत्वा ।
तस्यार्जनादिजनिताघचयार्जितात्ते[13]
भावी कथं नरकदुःखभराच्च मोक्षः ॥ ४८ ॥

देहममत्वमोचनाधिकारः ।

पुष्णासि यं देहमधान्यचिन्तयंस्तवोपकारं कमयं विधास्यति ।
कर्माणि कुर्वन्निति चिन्तयायतिं जगन्त्ययं वञ्चयते हि धूर्तराट् ॥ ४९ ॥

---

१ द्रव्यस्तवः पूजाप्रासादप्रतिमाप्रतिष्ठादिको भावकारणं द्रव्यमिति वचनात् स एव आत्मा स्वरूपं यस्य सः । २ सह आरम्भेण षट्कायाद्युपमर्देन वर्तते यः स तस्य भावस्तत्ता तया । एतावता धनप्रभवः पूजादिधर्मोऽपि किञ्चिदारम्भकलकितत्वान्निष्कलंको न भवति । ३ निर्गतः संगो धनधान्यादिर्नवविधः परिग्रहो यस्मात् स तस्य भावस्तत्ता सैवात्मा स्वरूप यस्य सः । अत्र अपिशब्दो वैलक्षण्यद्योतको वैलक्षण्यञ्चेदम्—द्रव्यस्तवात्मा धनसाधनो धर्मो भवान्तरे मुक्तिप्रापको भवति । नि.संगतात्मा तु धर्मस्तपःसंयमरूपो भवान्तरे तद्भवे वा मुक्तिप्रापको भवति । ४ गृहहट्टप्रभृतीनि । ५ सञ्चितैः । ६ निधानसहितैः । ७ अतिरिक्तः । ८ विशेषलाभः । ९ न यदि इति वा पाठः । १० षट्कायाद्युपमर्देर्व्याप्तः । ११ आदिशब्दात् चौरनटविटादयः । १२ परिग्रहवन्तं पुरुषं । पुरुषा इति वा पाठः । १३ येन परिग्रहेण । १४ चिन्ता परिग्रहस्याप्राप्तस्यार्जनोपायपरिचिन्तनं प्राप्तस्य परिरक्षणोपायचिन्तनञ्च तेन व्याकुलता अस्वास्थ्यम् तस्याः कृतेः करणात् । १५ व्याकुलिता इति पाठान्तरम् । १६ जिनभवनबिम्बपुस्तकसाधुसाध्वी श्रावकश्राविकारूपेषु सप्तसु प्रतिष्ठातीर्थयात्रासहितेषु नवसु वा । १७ आदिपदात् क्रयाणकक्रयविक्रयादयः ।

कारागृहाद्बहुविधाशुचितादिदुःखा-
न्निर्गन्तुमिच्छति जडोऽपि हि तद्विभिद्य ।
क्षिप्तस्ततोऽधिकतरे वपुषि स्वकर्म-
व्रातेन तद्दृढयितुं यतसे किमात्मन् ॥ ५० ॥
चेद्वाञ्छसीदमवितुं परलोकदुःख-
भीत्या ततो न कुरुषे किमु पुण्यमेव ।
शक्यं न रक्षितुमिदं हि न दुःखभीतिः
पुण्यं विना क्षयमुपैति च वज्रिणोऽपि ॥ ५१ ॥
देहे विमुह्य कुरुषे किमघं न वेत्सि
देहस्य एव भजसे भवदुःखजालम् ।
लोहाश्रितो हि सहते घनघातमग्नि-
र्बाधा न तेऽस्य च नभोवदनाश्रयत्वे ॥ ५२ ॥
दुष्टः कर्मविपाकभूपतिवशः कायाह्वयः कर्मकृत्
वध्वा कर्मगुणैर्हृषीकचषकैः पीतप्रमादासवम् ।
कृत्वा नारकचारकापदुचितं त्वां प्राप्य चाशु चञ्चलं
गन्तेति स्वहिताय संयमभरं तं वाहयाल्पं ददत् ॥ ५३ ॥
यतः शुचीन्यप्यशुचीभवन्ति कृम्याकुलात् काकशुनादिभक्ष्यात् ।
द्राग्भाविनो भस्मतया ततोऽगात् मांसादिपिण्डात् स्वहितं गृहाण॥५४
परोपकारोऽस्ति तपो जपो वा विनश्वराद्यस्य फलं न देहात् ।
सभाटकादल्पदिनात्तगेहमृत्पिण्डमूढः फलमश्नुते किम् ॥ ५५ ॥

---

१ प्राप्तोपि । २ आहाराद्यर्थं हिंसाकारित्वादिदोषदूषितः । अपावित्र्यादिदोषदूषितो वा । ३ दासः । कर्मकरः । ४ चारकः कारागृहं । चारको भोजके बन्धे इति त्रिकाण्डशेषे । ५ आयुःपूर्तिलक्षणं मिषं । ६ सप्तदशसंयमलक्षणं भरं । "पचासवाविरमणं पंचिंदियनिग्गहो कसायजओ । दंडत्तयस्स विरई सत्तरसहा संयमो होई ॥" इति प्रवचनसारोद्धारे । प्रकरणरत्नाकर, भाग ३ पृ० १६२ । ७ लघुकायभाटकप्रायमाहारादि ददत् । ८ "कुक्कुरस्तु शुनिः श्वानः कपिलो मण्डलः शुनः" इति वाचस्पतिः । ९ यथा कश्चिदल्पदिनमर्यादया भाटकेन गृहीते गृहे ममेदं गृहं मा विनश्यत्विति बुद्धया मूढमतिस्तद्गृहं न व्यापारयति स सम्पूर्णावधौ च परकीये गृहे जाते सति तस्य गृहस्य प्राप्तिफलरहितो

मृत्पिण्डरूपेण विनश्वरेण जुगुप्सनीयेन गदालयेन ।
देहेन चेदात्महितं सुसाधं धर्मान्न किं तद्यतसेऽत्र मूढ ॥ ५६ ॥

विषयप्रमादत्यागाधिकारः ।

अत्यल्पकल्पितसुखाय किमिन्द्रियार्थै-
स्त्वं मुह्यसि प्रतिपदं प्रचुरप्रमादः ।
एते क्षिपन्ति गहने भवभीमकक्षे
जन्तून्न यत्र सुलभा शिवमार्गदृष्टिः ॥ ५७ ॥

आपातरम्ये परिणामदुःखे सुखे कथं वैषयिके रतोऽसि ।
जडोऽपि कार्यं रचयन् हितार्थी करोति विद्वन् यदुदर्कतर्कम् ॥ ५८ ॥
यदिन्द्रियार्थैरिह शर्म विन्दवद्यदर्णवत् स्वःशिवगं परत्र च ।
तयोर्मिथोऽस्ति प्रतिपक्षता कृतिन् विशेषदृष्ट्यान्यतरद्गृहाण तत् ॥५९॥
भुंक्ते कथं नारकतिर्यगादिदुःखानि देहीत्यवधेहि शास्त्रैः ।
निवर्तते ते विषयेषु तृष्णा बिभेषि पापप्रचयाच्च येन ॥ ६० ॥
गर्भवासनरकादिवेदनाः पश्यतोऽनवरतं श्रुतेक्षणैः ।
नो कषायविषयेषु मानसं श्लिष्यते बुध विचिन्तयेति ताः ॥ ६१ ॥
वध्यस्य चोरस्य यथा पशोर्वा संप्राप्यमाणस्य पदं वधस्य ।
शनैः शनैरेति मृतिः समीपं तथाखिलस्येति कथं प्रमादः ॥ ६२ ॥
बिभेषि जन्तो यदि दुःखराशेस्तदिन्द्रियार्थेषु रतिं कृथा मा ।
तदुद्भवं नश्यति शर्म यद्राक् नाशे च तस्य ध्रुवमेव दुःखम् ॥ ६३ ॥
मृतः किमु प्रेतपतिर्दुरामया गताः क्षयं किं नरकाश्च मुद्रिताः ।
ध्रुवाः किमायुर्धनदेहबन्धवः सकौतुको यद्विषयैर्विमुह्यसि ॥ ६४ ॥
विमोह्यसे किं विषयप्रमादैर्भ्रमात् सुखस्यायतिदुःखराशेः ।
तद्वर्धमुक्तस्य हि यत् सुखं ते गतोपमं चायतिमुक्तिदं तत् ॥ ६५ ॥

भवति तथा यः परिमितायुषि शरीरे प्राप्ते ममेदं शरीरं परोपकारतपःकरणादिना दुर्बलं मास्त्विति बुद्धया मूढमतिस्तच्छरीरं न व्यापारयति सोऽप्यायुःपूर्तौ शरीरनाशे मानुष्य-शरीरप्राप्तिफलरहितो भवति ।

१ एकस्य सत्त्वे अपरस्यासत्त्वमितिरूपा वैरिता । २ तद्गार्ह्यमुक्तस्येति वा पाठः ।

कषायत्यागाधिकारः ।

रे जीव सेहिथ सहिष्यसि च व्यथास्ता-
स्त्वं नारकादिषु पराभवभृः कषायैः ।
मुग्धोदितैः कुवचनादिभिरप्यतः किं
क्रोधान्निहंसि निजपुण्यधनं दुरापम् ॥ ६६ ॥

परैराभिभूतौ यदि मानमुक्तिस्ततस्तपोऽखण्डमतः शिवं च ।
मानादृतिर्दुर्वचनादिभिश्च तपःक्षयस्तन्नरकादिदुःखम् ॥ ६७ ॥
वैरादि चात्रेति विचार्य लाभालाभौ कृतिन्नाभवसंभविन्यां ।
तपोऽथवा मानमवाभिभूताविहास्ति नूनं हि गतिर्द्वयैव ॥ ६८ ॥
(युग्मम्)

श्रुत्वाक्रोशान् यो मुदा पूरितः स्यात् लोष्टाद्यैर्यश्चाहतो लोमहर्षी ।
यः प्राणान्तेऽप्यन्यदोषं न पश्यत्येष श्रेयो द्राग् लभतैव योगी ॥६९॥
को गुणस्तव कदा च कषायैर्निर्ममे भजसि नित्यमिमान् यत् ।
किं न पश्यसि च दोषममीषां तापमत्र नरकं च परत्र ॥ ७० ॥
यत् कषायजनितं तव सौख्यं यत् कषायपरिहानिभवं च ।
तद्विशेषमथवैतदुदर्कं संविभाव्य भज धीर विशिष्टम् ॥ ७१ ॥
सुखेन साध्या तपसां प्रवृत्तिर्यथा तथा नैव तु मानमुक्तिः ।
आद्या न ददेऽपि शिवं परा तु निदर्शनाद्बाहुबलेः प्रदत्ते ॥ ७२ ॥
सम्यग् विचार्येति विहाय मानं रक्षन् दुरापाणि तपांसि यत्नात् ।
मुदा मनीषी सहतेऽभिभूतीः शूरः क्षमायामपि नीचजाताः ॥ ७३ ॥

---

१ दुर्वचनादिना पराभवे जायमाने । २ मानत्यागः । ३ तदा । ४ मानादरः । ५ भवं यावत् संभविनी तस्याम् । ६ अव रक्ष । ७ मार्गः । मानत्यागे आभवसंभविवचनमात्रपराभवो भवति । मानादरे च परभवसंभवी नरकादिपराभवो भविष्यति । अतो लाभालाभरूपं मार्गद्वयं विचार्य यदिष्टं तद्गृहाण । ८ व्याप्तः । ९ न वक्ति । १० अत्र एवकारोऽत्यन्तायोगं व्यवच्छिनत्ति । ११ तयोः कषायजनितसुखकषायक्षयजनितसुखयोर्विशेषं न्यूनाधिकगुणतालक्षणं । १२ अथवा कषायकरणकषायक्षयकरणयोरुत्तरकालप्रादुर्भूतं कुगतिसुगतिलक्षणं फलं साध्यं (सम्यक् पर्यालोच्य)। १३ अनयोर्मध्ये वरिष्ठं। १४ अत्रापिशब्देन तपसा प्रवृत्तिर्मानमुक्तिसहिता शिवं दत्ते मानसहिता च शिवं न दत्ते इति सूच्यते। १५ बाहुबलिकथा परिशिष्टतो ज्ञेया। १६ क्षमायां शूरः। क्षमाशील इत्यर्थः।

पराभिभूत्यालिपकयापि कुप्यस्यैधैरपीमां प्रतिकर्तुमिच्छन् ।
न वेत्सि तिर्यङ्नरकादिकेषु तास्तैरनन्तास्त्वतुला भवित्रीः ॥ ७४ ॥
धत्से कृतिन् यद्यपकारकेषु मानं ततो धेह्यरिषट्क एव ।
अथोपकारिष्वपि तद्भवार्तिकृत्कर्महृन्मित्रबहिर्द्विषत्सु ॥ ७५ ॥
अधीत्यनुष्ठानतपःशमाद्यान् धर्मान् विचित्रान् विदधत् समाधान् ।
न लप्स्यसे तत्फलमात्मदेहक्लेशाधिकं तांश्च भवान्तरेषु ॥ ७६ ॥
सुखाय धत्से यदि लोभमात्मनो ज्ञानादिरत्नत्रितये विधेहि तत् ।
दुःखाय चेदत्र परत्र चाकृतिन् परिग्रहे तद्बहिरान्तरेऽपि च ॥ ७७ ॥
करोषि यत् प्रेत्यहिताय किञ्चित् कदाचिदल्पं सुकृतं कथंचित् ।
मा जीहरस्तन्मदमत्सराद्यैर्विना च तन्मा नरकातिथिर्भूः ॥ ७८ ॥
पुरापि पापैः पतितोऽसि संसृतौ दधासि रे किं गुणिमत्सरं पुनः ।
न वेत्सि किं घोरजले निपात्यसे नियंत्र्यसे शृंखलया च सर्वतः ॥७९॥
कष्टेन धर्मो लवशो मिलत्ययं क्षयं कषायैर्युगपत् प्रयाति च ।
अतिप्रयत्नार्जितमर्जुनं ततः किमज्ञ ही हारयसे नभस्वता ॥ ८० ॥

शत्रूभवन्ति सुहृदः, कलुषीभवन्ति
धर्मा, यशांसि निचितायशसीभवन्ति ।

---

१ वधबन्धनादिपापकर्मभिरपि । २ कामक्रोधलोभमानमदहर्षलक्षण । तत्र परपरिगृहीतास्वनूढास्वपि वा स्त्रीषु दुरभिसन्धिः कामः । परस्यात्मनोऽपायमविचार्य कोपकरण क्रोधः । दानार्हेषु स्वधनाप्रदान निष्कारण परधनग्रहण च लोभः । दुरभिनिवेशो मोक्षोद्युक्तोक्ताग्रहणं वा मानः । कुलमदादिभिरहंकारकरणं मदः । परदुःखोत्पादनेन स्वस्य द्यूतपापद्धर्याद्यनर्थसंश्रयेण वा मन.प्रमोदो हर्षः । ३ तदा । ४ भवार्तिकृन्ति कर्माणि (ज्ञानावरणीयादीनि) तानि हरन्तीति हृन्ति भवार्तिकृत्कर्महृन्ति (परीषहादीनि)। तान्येव च कर्मक्षयलक्षणोपकारकत्वेन मित्राणि भवार्तिकृत्कर्महृन्मित्राणि । तान्येव वहिर्द्विषदो वाह्यवैरिणस्तेषु । ५ अध्ययनम् । ६ षडावश्यकादिक्रियाः । ७ मायया सहितान् । ८ अतिरिक्तं । ९ किंतु पुनः । १० ज्ञानदर्शनचारित्ररूपरत्नत्रये । ११ अपण्डित । १२ वाह्यपरिग्रहे धनधान्यादिके नवविधे आन्तरे च परिग्रहे कषायलक्षणे । १३ मा हारय । १४ मदश्च जात्यादिभिरवलिप्तता । मत्सरश्च परसंपदसहनं । १५ सुवर्ण । तपनीयचामीकरचन्द्रभर्मार्जुननिष्ककार्तस्वरकर्बुराणि । १०४४ इति अभिधानचिन्तामणौ हेमचन्द्रः । १६ फूत्कारवातेन । "ध्मातं सुवर्णं फूत्कारेण हारितमि"त्याभाणकः । १७ अतिशयेन अकीर्तयो भवन्ति ।

म्रियन्ति नैव पितरोऽपि न बान्धवाश्च
लोकद्वयेऽपि विपदो भविनां कषायैः ॥ ८१ ॥
रूपलाभकुलविक्रमविद्याश्रीतपोविदितरणप्रभुताद्यैः ।
किं मदं वहसि वेत्सि न मूढानन्तशः स्वभृशलाघवदुःखम् ॥ ८२ ॥
विना कषायान्न भवार्तिराशिर्भवेद्भवेदेव च तेषु सत्सु ।
मूलं हि संसारतरोः कषायान्तत्तान् विहायैव सुखी भवात्मन् ॥ ८३ ॥
समीक्ष्य तिर्यङ्नरकादिवेदनाः श्रुतेक्षणैर्धर्मदुरापतां तथा ।
प्रमोदसे यद्विषयैः सकौतुकैस्ततस्तवात्मन् विफलैव चेतना ॥ ८४ ॥
चौरैस्तथा कर्मकरैर्गृहीते दुष्टैः स्वमात्रेऽप्युपतप्यसे त्वम् ।
पुष्टैः प्रमादैस्तनुभिश्च पुण्यधनं न किं वेत्स्यपि लुट्यमानम् ॥ ८५ ॥
मृत्योः कोऽपि न रक्षितो न जगतो दारिद्र्यमुत्रासितं
रोगस्तेननृपादिजा न च भियो निर्नाशिताः षोडश ।
विध्वस्ता नरका न नापि सुखिता धर्मस्त्रिलोकी सदा
तत् को नाम गुणो मदश्च विभुता का ते स्तुतीच्छा च का ॥८६॥

शास्त्रगुणाधिकारः ।

शिलातलामे हृदि ते वहन्ति विशन्ति सिद्धान्तरसा न चान्तः ।
यदत्र नो जीवदयार्द्रतास्ते न भावनाङ्कूरततिश्च लभ्या ॥ ८७ ॥
यस्यागमाम्भोदरसैर्न धौतः प्रमोदपंकः स कथं शिवेच्छुः ।
रसायनैर्यस्य गदाः क्षता नो सुदुर्लभं जीवितमस्य नूनम् ॥ ८८ ॥

---

१ दानं । प्रभुता ऐश्वर्यं । आदिपदात् रमणीमन्दिरादिग्रहणम् । २ स्वस्य भृशं अत्यर्थं लाघवदुःखं लघुतादुःखं भावि भूतं वा न वेत्सि । उक्तञ्च—"जातिलाभकुलैश्वर्यबलरूपतपःश्रुतैः । कुर्वन् मद पुनस्तानि हीनानि लभते जनः ॥" ३ धर्मदुरापतायां दश दृष्टान्ताः परिशिष्टादवगन्तव्याः । ४ ज्ञानं । ५ सुवर्णादिद्रव्यमात्रे । ६ षोडश भियः परिशिष्टे निदर्शिताः सन्ति । ७ सुखं संजातमस्या इति सुखिता । सुखवती कृता । ८ प्रवाहमार्गेणोपरि गच्छन्ति । ९ जिनागमजलानि । १० ते इति वा पाठः । ११ स्यात् प्ररोहोऽङ्कुरोऽङ्कूरो रोहश्च स तु पर्वणः । १११८ इति अभिधानचिन्तामणौ । १२ अज्ञानसंशयविपर्ययरागद्वेषस्मृतिभ्रंशयोगदुःप्रणिधानधर्मानादरभेदादष्टविधः प्रमादः ।

अधीतिनोऽर्चादिकृते जिनागमः प्रमादिनो दुर्गतिपापतेर्मुधा ।
ज्योतिर्विमूढस्य हि दीपपातिनो गुणाय कस्मै शलभस्य चक्षुषी ॥८९॥
मोदन्ते बहुतर्कतर्कणचणाः केचिज्जयाद्वादिनां
काव्यैः केचन कल्पितार्थघटनैस्तुष्टाः कविख्यातितः ।
ज्योतिर्नाटकनीतिलक्षणधनुर्वेदादिशास्त्रैः परे
ब्रूमः प्रेत्यहिते तु कर्मणि जडान् कुक्षिंभरीनेव तान् ॥ ९० ॥
किं मोदसे पण्डितनाममात्रात् शास्त्रेष्वधीती जनरञ्जकेषु ।
तत् किञ्चनाधीष्व कुरुष्व चाशु न ते भवेद्येन भवाब्धिपातः ॥ ९१ ॥
धिगागमैर्मांद्यसि रञ्जयन् जनान् नोद्यच्छसि प्रेत्यहिताय संयमे ।
दधासि कुक्षिंभरिमात्रतां मुने क्व ते क्व तत् कैष च ते भवान्तरे॥९२॥
धन्याः केऽप्यनधीतिनोऽपि सदनुष्ठानेषु बद्धादरा
दुःसाध्येषु परोपदेशलवतः श्रद्धानशुद्धाशयाः ।
केचित्त्वागमपाठिनोऽपि दधतस्तत्पुस्तकान् येऽलसाः
अत्रामुत्रहितेषु कर्मसु कथं ते भाविनः प्रेत्यहाः ॥ ९३ ॥
धन्यः स मुग्धमतिरप्युदितार्हदाज्ञा-
रागेण यः सृजति पुण्यमदुर्विकल्पः ।
पाठेन किं व्यसनतोऽस्य तु दुर्विकल्पै-
र्यो दुःस्थितोऽत्र सदनुष्ठितिषु प्रमादी ॥ ९४ ॥
अधीतिमात्रेण फलन्ति नागमाः समीहितैर्जीव सुखैर्भवान्तरे ।
स्वनुष्ठितैः किंतु तदीरितैः, खरो न यत् सिताया वहनश्रमात्सुखी ॥९५

---

१ पूजाप्रतिष्ठार्थं । आदिपदात् वादार्थं अधीतिनः अध्ययनशीलस्य । २ दुर्गति-पतनशीलस्य । अत्र पापतेरिति पतधातोः यडि डौ सासहिवावहिचाचलिपापतिरिति सूत्रेण षष्ठ्यां साधुः । ३ दीपदीप्तिमोहितस्य । ४ बहूनां प्रमाणादिपदानां तर्काणां तर्कण विचारणं तेन प्रसिद्धाः । ५ लक्षणानि सामुद्रिकशास्त्राणि । आदिपदात् ब्रह्म-यामल रुद्रयामल वास्तुशास्त्र काल्यायनवात्स्यायन शकुनशास्त्रैः ६ ब्रूम इति बहुवचनप्र-योगः समानधर्माणामेकवाक्यतासूचनार्थम् । ७ आगमाः । ८ प्रेत्यहित । ९ संयमः । १० तप.संयमादिक्रियासु । ११ सुगुरूपदेशात् । १२ सम्यक्त्वनिर्मलचित्ताः । १३ परलोकहितहन्तारः । १४ करोति । १५ शंकाकांक्षादिदुष्टविकल्परहितः ।

दुर्गन्धतो यदणुतोऽपि पुरस्य मृत्यु-
रायूंषि सागरमितान्यनुपक्रमाणि ।
स्पर्शः खरः ककचतोऽतिनमामितश्च
दुःखावनन्तगुणितौ भृशशैत्यतापौ ॥ ९६ ॥
तीव्रा व्यथाः सुरकृता विविधाश्च यत्रा-
क्रन्दारवैः सततमभ्रभृतोऽप्यमुष्मात् ।
किं भाविनो न नरकात् कुमते बिभेषि
यन्मोदसे क्षणसुखैर्विषयैः कषायी ॥ ९७ ॥ युग्मम्

बन्धोऽनिशं वाहनताडनानि क्षुत्तृड्दुरामातपशीतवाताः ।
निजान्यजातीयभयापमृत्यू दुःखानि तिर्यक्ष्विति दुःसहानि ॥ ९८ ॥
मुधान्यदास्याभिभवाभ्यसूया भियोऽन्तगर्भस्थितिदुर्गतीनाम् ।
एवं सुरेष्वप्यसुखानि नित्यं किं तत्सुखैर्वा परिणामदुःखैः ॥ ९९ ॥
सप्तभीत्यभिभवेष्टविप्लवानिष्टयोगगददुःखितादिभिः ।
स्याच्चिरं विरसता नृजन्मनः पुण्यतः सरसतां तदानय ॥ १०० ॥
इति चतुर्गतिदुःखततीः कृतिन्नतिभयास्त्वमनन्तमनेहसम् ।
हृदि विभाव्य जिनोक्तकृतान्ततः कुरु तथा न यथास्युरिमास्तव॥१०१॥

---

१ यस्य नरकस्य परमाणुकणोपमितादपि दुर्गन्धतः । २ सागरोपमकाललक्षणं परिशिष्टे द्रष्टव्यम् । ३ नास्ति उपक्रम आद्यारम्भो येषु तानि । ४ अतिशयेन । ५ मनुष्यलोकगताच्छैत्यात्तापाद्वा । ६ दुःखोत्पादकौ । ७ अभ्रं नभोमार्गं भरति पूरयति इति तस्मात् । ८ दुष्टरोगाः । मुखपाकपादपाककुष्ठादयः । आम आमय आकल्यमुपतापो गदः समाः । ४६३ इति अभिधानचिन्तामणौ हेमचन्द्रः । अपमृत्युर्गलमोटनगलकर्तनादिना मरणं । अत्र अपमृत्यु० इति वा पाठः । ९ उदरपूरणार्थरहितमन्येषां दास्य । १० अन्ते देवभवस्थितिपर्यवसाने यद्वा अन्तश्च देवभवायुःपर्यवसानं गर्भस्थितिश्च मनुष्यतिर्यक्स्त्रीणामुदरेषु गर्भत्वेन अवस्थानं दुर्गतयश्च पृथिव्याद्येकेन्द्रियेषु गमनानि तासाम् । ११ इहलोकभयं, परलोकभयं, आदानभयं, अकस्माद्भय, आजीविकाभयं, मरणभय, लोकापवादभयं अथवा अयशोभयं इति सप्त भयस्थानानि । १२ इष्टवियोगः । १३ आदिपदात् कुग्रामकुनृपतिसेवाकुभोजनकुलकलत्रनिर्धनत्वनिःपुत्रत्वकन्यावहुत्वादिग्रहणम् । १४ अनन्त कालं यावदनुभूताः । १५ भगवदुक्तसिद्धान्ततः । राद्धसिद्धकृतेभ्योऽन्त आप्तोक्तिः समयागमौ । २४२ इति अभिधानचिन्तामणौ । १६ इमाश्चतुर्गतिदुःखततयः ।

आत्मन् परस्त्वमसि [1]साहसिकः श्रुताक्षै-
र्यद्भाविनं चिर[2]चतुर्गतिदुःखराशिं ।
पश्यन्नपीह न बिभेषि ततो न तस्य
विच्छित्तये च यतसे विपरीत[3]कारी ॥ १०२ ॥

चित्तदमनाधिकारः ।

कु[4]कर्मजालैः कुवि[5]कल्पसूत्रजैर्निबध्य गाढं नरकाग्निभिश्चिरं ।
विसारवत् पक्ष्यति जीव हे मनः[6]कैवर्तकस्त्वामिति मास्य विश्वसीः १०३

चेतोऽर्थये मयि चिर[7]लसख प्रसीद
किं दुर्विकल्पनिकरे क्षिपसे भवे मां ।
बद्धोऽञ्जलिः कुरु कृपां भज सद्विकल्पान्
मैत्रीं कृतार्थय यतो नरकाद्बिभेमि ॥ १०४ ॥

स्वर्गापवर्गौ नरकं तथान्तर्[8]मुहूर्तमात्रेण वशावशं यत् ।
ददाति जन्तोः सततं, प्रयत्नाद्वशं तदन्तःकरणं कुरुष्व ॥ १०५ ॥
सुखाय दुःखाय च नैव देवा न चापि कालः सुहृदोऽरयो वा ।
भवेत् [9]परं मानसमेव जन्तोः संसारचक्रभ्रमणैकहे[10]तु[11] ॥ १०६ ॥
वशं मनो यस्य [12]समाहितं स्यात् किं तस्य कार्यं नियमैर्यमैश्च[13] ।
हतं मनो यस्य च दुर्विकल्पैः किं तस्य कार्यं नियमैर्यमैश्च ॥ १०७ ॥

---

१ परः साहसिकोऽविमृश्यकारी । २ देवनरतिर्यङ्नरकगतिदुःखसमूहम् । ३ शास्त्रोक्तार्थाद्विपरीतसमाचरणः सन् । ४ ज्ञानावरणीयाद्यष्टविधदुष्टकर्मलक्षणमत्स्यजालैः । ५ कुचिन्तनरूपतन्तुजन्यैः । ६ मत्स्यमिव । ७ अत्रात्मनो मनश्चिरन्तनमित्रता व्यवहारतोऽनेकभवसम्बन्धादेव प्रतीता । ८ धर्मध्यानहेतुकार्यचिन्तनलक्षणान् । ९ अन्तर् मनः । १० केवलम् । ११ अत्र हेतुशब्दो जहल्लिङ्गः । १२ समाधियुक्तं । रागद्वेषरहितमित्यर्थः । १३ शौचादिभिः पञ्चभिः । शौच सन्तोष स्वाध्यायस्तपो देवताप्रणिधानञ्चेति नियमा. । कायमनसोः शुद्धिः शौचम् । संनिहितसाधनादधिकस्यानुपादित्सा सन्तोषः । मोक्षशास्त्रस्याध्ययनं प्रणवजपो वा स्वाध्यायः । तपश्चान्द्रायणादि । देवताया वीतरागस्य प्रणिधानमात्मना सर्वतः संभेदः । १४ अहिंसादिभि. । "अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहाः ।" स्तेयमदत्तादानं तदभावोऽस्तेय । अपरिग्रहः परिग्रहत्यागोऽकिञ्चनतेत्यर्थः ।

दानश्रुतध्यानतपोऽर्चनादि[1] वृथा मनोनिग्रहमन्तरेण ।
कषायचिन्ताकुलतोज्झितस्य परो हि योगो[4] मनसो वशत्वम् ॥ १०८ ॥
जपो न मुक्त्यै न तपो द्विभेदं न संयमो नापि दमो न मौनम् ।
न साधनाद्यं पवनादिकस्य किं त्वेकमन्तःकरणं सुदान्तम् ॥ १०९ ॥
लब्ध्वापि धर्मं सकलं जिनोदितं सुदुर्लभं पोतनिभं विहाय च ।
मनःपिशाचग्रहिलीकृतः पतन् भवाम्बुधौ नायतिदृग् जडो जनः॥११०॥
सुदुर्जयं ही रिपवत्यदो मनो रिपूकरोत्येव च वाक्तनू अपि ।
त्रिभिर्हतस्तद्रिपुभिः करोतु किं पदीभवन् दुर्विपदां पदे पदे ॥१११॥
रे चित्त वैरि तव किं नु मयापराद्धं
यद्दुर्गतौ क्षिपसि मां कुविकल्पजालैः ।
जानासि मामयमपास्य शिवेऽस्ति गन्ता
तत् किं न सन्ति तव वासपदं ह्यसंख्याः ॥ ११२ ॥
पूतिश्रुतिश्चेव रतेर्विदूरे कुष्टीव संपत्सुदृशामनर्हः ।
श्वपाकवत् सद्गतिमन्दिरेषु नार्हेत् प्रवेशं कुमनोहतोऽङ्गी ॥ ११३ ॥
तपोजपाद्याः स्वफलाय धर्मा न दुर्विकल्पैर्हतचेतसः स्युः ।

---

१ दानं पञ्चविध अभयदान, सुपात्रदान, अनुकम्पादानं, उचितदानं, कीर्तिदानञ्चेति । श्रुतं श्रुतज्ञान शास्त्राध्ययन । ध्यान धर्मध्यानं शुक्लध्यानञ्च । तपश्च द्वादशभेदं । अर्चनं अष्टप्रकारादिपूजा । २ आदिपदात् तीर्थयात्राप्रतिष्ठादिधर्मकर्मपरिग्रहः । ३ कषायेभ्यः क्रोधादिभ्यश्चिन्तया आर्तध्यानरौद्रध्यानात्मिकतया आकुलता । ४ प्रकृष्टः । ५ मुक्त्यंगं । ६ बाह्याभ्यन्तरभेदेन द्विप्रकारं तपोऽनशनप्रायश्चित्तादि । ७ पञ्चास्रवविरमणादिः सप्तदशविधः । ८ पञ्चेन्द्रियदमनं । ९ वाक्संयमः । १० आद्यपदेन अवस्थानासनबन्धनादि परिग्रहः । ११ आदिपदेन ध्यानासनादिपरिग्रहः । १२ विकलीकृतः । १३ रिपुवदाचरति स्वयं । १४ "इदमः प्रत्यक्षगते समीपतरवर्तिन्येतदो रूपम् । अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् ॥" १५ त्रिभिः (रिपुभिः) वाक्कायमनोलक्षणैः । १६ आस्पदीभवन् । १७ वितर्कं । १८ अपराधविषयीकृतं विनाशितमित्यर्थः । अत्र वैरिशब्दस्य मनोविशेषणत्वेन नपुंसकलिंगता । १९ सिद्धावस्थायामात्मनोऽमनस्कत्वस्य सिद्धान्ते भणनात् । २० पूतिश्रुतिः इति वा पाठः । २१ पूतिपरिपाकतः कुत्सितगन्धौ श्रुती कर्णौ यस्य सः । २२ सम्पद एव सुदृशस्तासाम् । सम्पत्सु दृशाम् इति वा पदच्छेदः । २३ आद्यपदात् स्वाध्यायप्रमुखा धर्माः । २४ तत्वतो मोक्षफलाय ।

तत्खाद्यपेयैः सुभृतेऽपि गेहे क्षुधातृषाभ्यां म्रियते स्वदोषात् ॥ ११४ ॥
अक्लेच्छ्रसाध्यं मनसो वशीकृतात् परं च पुण्यं, न तु यस्य तद्वशम् ।
स वञ्चितः पुण्यचयैस्तदुद्भवैः फलैश्च ही ही हतकः करोतु किम् ॥ ११५ ॥
अकारणं यस्य सुदुर्विकल्पैर्हतं मनः शास्त्रविदोऽपि नित्यम् ।
घोरैरघैर्निश्चितनारकायुर्मृत्यौ प्रयाता नरके स नूनम् ॥ ११६ ॥
योगस्य हेतुर्मनसः समाधिः परं निदानं तपसश्च योगः ।
तपश्च मूलं शिवशर्मवल्ल्या मनःसमाधिं भज तत् कथञ्चित् ॥ ११७ ॥
स्वाध्याययोगैश्चरणक्रियासु व्यापारणैर्द्वादशभावनाभिः ।
सुधीस्त्रियोगीसदसत्प्रवृत्तिफलोपयोगैश्च मनो निरुन्ध्यात् ॥ ११८ ॥
भावनापरिणामेषु सिंहेष्विव महावने ।
सदा जाग्रत्सु दुर्ध्यानशूकरा न विशन्त्यपि ॥ ११९ ॥

वैराग्यधर्मोपदेशः ।

किं जीव माद्यसि हसस्यर्थमीहसेऽर्थान्
कामांश्च खेलसि तथा कुतुकैरशंकः ।

---

१ स्वसमुत्थक्लेशमान्द्यप्रमादलक्षणदोषात् । २ सुखसाध्यम् अशुभविषयान्तरसंचारादिना व्याघाताभावात् । ३ निगृहीतात् शुभयोगव्यापृताद्वा मनसः । ४ प्रकृष्टं । स्वर्गापवर्गादिप्रापणप्रवणपुण्यम् । ५ पुनर् । ६ मनः । यस्य पुंसस्तन्मनो वशं न स इत्युत्तरार्द्धेनान्वयः ७ ज्ञानदर्शनचारित्रात्मकस्याष्टांगस्य वा । ८ एकाग्रता । रागद्वेषराहित्यमित्यर्थः । ९ साधनम् । १० भर इति पाठान्तरम् । भर–धर । ११ स्वाध्यायश्च वाचना पृच्छना परावर्तना अनुप्रेक्षा धर्मकथाभिधः पञ्चविधः । योगाश्च सिद्धान्ताध्ययनायोद्देशसमुद्देशानुज्ञादिकाः पूर्वक्रियाविशेषाः सम्प्रदायगम्याः । यद्वा पञ्चविधानां स्वाध्यायानां योगा व्यापारास्तैः । १२ प्रतिलेखनप्रमार्जनकायोत्सर्गादिषु शुभानुष्ठानेषु व्यापारणैः प्रवर्तनैः । १३ अनित्यता अशरण भव एकत्व अन्यता अशौच आस्रव संवर निर्जरा धर्म लोकबोधिलक्षणास्ताभिः । १४ त्रयाणां मनोवाक्काययोगानां समाहारस्त्रियोगी तस्याः सदसत्प्रवृत्तिफलोपयोगैः सती च असती च सदसती ते च ते प्रवृत्ती च तयोः फल शुभाशुभ कर्म सुखदुःख वा तस्योपयोगाः—सत्प्रवृत्त्या शुभकर्मोपार्जना भवति असत्प्रवृत्त्या चाशुभकर्मोपार्जना भवति इति चिन्तनरूपास्तैः । १५ भावनाध्यवसायेषु । १६ अनुभूयमानेषु । १७ अपिशब्दात् प्रवेशोऽपि न भवति तदा तेषां तत्र स्थितिः कौतस्कुतीत्यर्थद्योतकः । १८ अय मानसप्रत्यक्षसिद्धस्त्वं । १९ रमसे । २० तेन प्रकारेण । २१ कुतूहलजनकैर्द्यूतादिभिः ।

चिक्षिप्सु घोरनरकावटकोटरे त्वा-
मभ्यापतल्लघु विभावय मृत्युरक्षः ॥ १२० ॥
आलम्बनं तव लवादिकुठारघाता-
श्छिन्दन्ति जीविततरुं न हि यावदात्मन् ।
तावद्यतस्व परिणामहिताय तस्मि-
श्छिन्ने हि कः क्व च कथं भविता स्वतन्त्रः ॥ १२१ ॥
त्वमेव मोग्धा मनिता त्वमात्मन्नेष्टाप्यनेष्टा सुखदुःखयोस्त्वम् ।
दाता च भोक्ता च तयोस्त्वमेव तच्चेष्टसे किं न यथाहितासि ॥ १२२ ॥
कस्ते निरञ्जन चिरं जनरञ्जनेन
धीमन् गुणोऽस्ति परमार्थदृशेति पश्य ।
तं रञ्जयाशु चरितैर्विशदैर्भवाब्धौ
यस्त्वां पतन्तमवलं परिपातुमीष्टे ॥ १२३ ॥
विद्वानहं सकललब्धिरहं नृपोऽहं
दाताहमद्भुतगुणोऽहमहं गरीयान् ।

---

१ नरकगतिगर्तैकदेशशुषिरप्रदेशे । २ अभिमुखमागच्छत् । ३ शीघ्रम् । ४ आधारम् । ५ लवः कालविशेषः स आदौ येषां ते लवादयस्त एव कुठारास्तेषां घाताः प्रहाराः । आदिपदात् प्रहरदिनाहोरात्रादिपरिग्रहः । "अष्टादश निमेषाः स्युः काष्ठा काष्ठाद्वयं लवः ॥" ६ आयतिहितार्थं तपःसंयमादौ । ७ स्वायत्तः । ८ मुह्यतीति मोग्धा अज्ञाता । मन्यते जानातीति मनिता ज्ञाता । ९ सुखस्य वाञ्छाकर्ता । १० द्वेष्टा दुःखस्य । ११ हितामिमनतिक्रम्य । यथासुखम् । सर्वमात्मायत्तं वर्तते न तु दैवायत्तं तथा च किं न यतसे इति भावः । १२ हे निर्लेप । सम्यक्त्ववत्त्वेन विरतिमत्त्वेन च मिथ्यात्वाविरतिरूपाञ्जनरहितत्वादिति संबोधनम् । भाविसिद्धत्वावस्थायां सकलकर्मरूपाञ्जनरहितत्वाद्भाव्यवस्थयेति वा संबोधनम् । १३ आ वाल्यात् आवार्द्धक्यम् । १४ धीर्हिताहितपरिज्ञानं सास्यास्तीति तथेति सम्बोधनम् । अत्र कोमलवचनसंबोधनपदद्वयेनामन्त्रण धर्मोपदेशश्रवण प्रति श्रोतुराभिमुख्यापादनार्थम् । कोमलवचनेनामन्त्रितो हि श्रोता प्रसन्नचित्तः सम्यक् श्रोतु प्रवर्तते । १५ धर्मलक्षणं पदार्थम् । "दुर्गतिप्रपतत्प्राणिधारणाद्धर्म उच्यते" ।

इत्याद्यहंकृतिवशात् परितोपमेपि
नो वेत्सि किं परभवे लघुतां भवित्रीम् ॥ १२४ ॥
वेत्सि स्वरूपफलसाधनबाधनानि
धर्मस्य, तं प्रभवसि स्ववशश्च कर्तुम् ।
तस्मिन् यतस्व मतिमन्नधुनेत्यमुत्र
किञ्चित्त्वया हि नहि सेत्स्यति भोत्स्यते वा ॥ १२५ ॥
धर्मस्यावसरोऽस्ति पुद्गलपरावर्तैरनन्तैस्तवा-
यातः संप्रति जीव हे प्रसहतो दुःखान्यनन्तान्यियम् ।
स्वल्पोहः पुनरेष दुर्लभतमश्चास्मिन् यतस्वार्हतो
धर्मं कर्तुमिमं विना हि नहि ते दुःखक्षयः कर्हिचित् ॥१२६॥
गुणस्तुतीर्वाञ्छसि निर्गुणोऽपि सुखप्रतिष्ठादि विनापि पुण्यम् ।
अष्टांगयोगञ्च विनापि सिद्धीर्वातूलता कापि नवा तवात्मन् ॥ १२७ ॥
पदे पदे जीव पराभिभूतीः पश्यन् किमीर्ष्यस्यधमः परेभ्यः ।
अपुण्यमात्मानमवैषि किं न तनोपि किं वा नहि पुण्यमेव ॥ १२८ ॥

---

१ "जातिलाभकुलैश्वर्यबलरूपतपःश्रुतैः । कुर्वन् मदं पुनस्तानि हीनानि लभते जनः॥" इति योगशास्त्रे श्रीहेमचन्द्रसूरिः । २ स्वरूपं क्षान्त्यादिदशप्रकारं फलञ्च स्वर्गापवर्गादि साधनञ्च चत्तारि परमगानि दुल्लहानीह जतुण । मानुपत्त (मानुषत्वं) सुई (श्रुतिः) सद्धा (श्रद्धा) संजमम्मि च वीरियम् (संयमवीर्यम्) इति चतुर्विधम् । बाधनञ्च प्रमादरूप तानि । ३ यतिधर्मस्य श्राद्धधर्मस्य वा । ४ धर्मम् । ५ स्वाधीनः सन् । ६ परलोकसाधनादिकम् । ७ त्वया (करणभूतेन) । ८ सिद्धिं यास्यति । ९ किञ्चिद्धर्मस्य स्वरूपफलादि वस्तु नहि भोत्स्यते ज्ञास्यते त्वया (कर्तृभूतेन) वा अथवा । १० द्रव्यक्षेत्रकालभावभेदैश्चतुर्धा पुद्गलपरावर्तः । औदरिक वैक्रिय तैजस भाषा श्वासोच्छ्वास मनःकार्मणरूपतया सर्वपुद्गलान् परिणमय्य परिणमय्यैको यदा मुचति तदा बादरद्रव्यपुद्गलपरावर्तः । एतेषां सप्तानां मध्यादेकेन केनचिद्रूपेण सर्वान् पुद्गलान् परिणमय्य यदा मुंचति तदा सूक्ष्मद्रव्यपुद्गलपरावर्तः । एव क्रमेण सर्वाण्यपि अनुभागबन्धाध्यवसायस्थानानि यावंता मरणेन स्पृष्टानि स्युस्तावान् कालः । ११ प्रकर्षेण सहमानस्य । १२ धर्मस्य अयं प्रत्यक्षोऽनुभूयमानोऽवसरः प्रस्तावः । १३ स्तोकदिन आयातः । १४ श्रेष्ठित्व प्रधानत्वनरनायकत्वादिरूपा । ते आदौ प्रथमं यत्र तत्तथा । आदिपदात् स्वर्गापवर्गादिपरिग्रहः । १५ यमनियमादीनि योगस्याष्टावगानि । १६ लघिमादिसिद्धयश्चाष्टधा । १७ तव वातूलता कापि अवक्तव्या नवा अपूर्वाश्चर्यकारिणी । १८ क्रुध्यसि ।

किमर्दयन्निर्दयमङ्गिनो लघून् विचेष्टसे[1] कर्मसु ही प्रमादतः ।
यदेकशोऽप्यन्यकृतार्दनः सहत्यनन्तशोऽप्यङ्गिचयमर्दनं भवे[2] ॥ १२९ ॥

यथा सर्पमुखस्थोऽपि भेको जन्तूनि भक्षयेत् ।
तथा मृत्युमुखस्थोऽपि किमात्मन्नर्दसेऽङ्गिनः[3] ॥ १३० ॥

आत्मानमल्पैरिह वञ्चयित्वा प्रकल्पितैर्वा तनुचित्तसौख्यैः ।
भवाधमे[4] किं जन सागराणि सोढासि ही नारकदुःखराशीन्[5] ॥ १३१ ॥

उरभ्रकाकिण्युदबिन्दुकाम्रवणिक्त्रयीशाकटभिक्षुकाद्यैः ।
निदर्शनैर्हारितमर्त्यजन्मा दुःखी प्रमादैर्बहु शोचितासि[6] ॥ १३२ ॥

पतंगभृंगैणखगाहिमीनद्विपद्विषत्पारिप्रमुखाः प्रमादैः[7] ।
शोच्या यथा स्युर्मृतिबन्धदुःखैश्चिराय भावी त्वमपीति जन्तो[8] ॥ १३३ ॥

पुरापि पापैः पतितोऽसि दुःखराशौ पुनर्मूढ करोषि तानि ।
मज्जन्महापंकिलवारिपूरे शिला निजे मूर्ध्नि गले च धत्से[9] ॥ १३४ ॥

पुनः पुनर्जीव तवोपदिश्यते विभेषि दुःखात् सुखमीहसे चेत्[10] ।
कुरुष्व तत्किञ्चन येन वाञ्छितं भवेत्तवास्तेऽवसरोऽयमेव यत्[11] ॥ १३५ ॥

धनांगसौख्यस्वजनानसूनपि त्यज त्यजैकं न च धर्ममार्हतम् ।
भवन्ति धर्माद्धि भवे भवेऽर्थितान्यमून्यमीभिः पुनरेष दुर्लभः[12] ॥ १३६ ॥

---

१ प्रवर्तसे । २ यस्मात् एकवारम् । ३ विनिर्मितपरपीडः । कृतमर्दनं येन स कृतार्दनः । अन्यस्य कृतार्दनः अन्यकृतार्दन. । कृतान्यार्दन इत्यर्थे समास इति कथञ्चित् समाधेयं । ४ अयं परपीडाकारी अङ्गी प्राणी । ५ इह भवे । मनुष्यजन्मनि । ६ कायिकमानसिकसुखैः । ७ भवेषु चतुर्गतिलक्षणेषु संसारेषु अधमे नीचे नरकभवे इत्यर्थः । ८ सागरोपमान् कालान् यावत् । सागरोपमकाललक्षणं परिशिष्टे द्रष्टव्यम् । ९ उरभ्रः अजः । काकिणी रूपकाशीतितमो भागः । क्वचित्तु विंशतिवराटकप्रमाणको नाणकविशेषः। उदबिन्दुर्दर्भाग्रवर्ती जलकणः । शाकटः शाकटिकः । आद्यपदेन ये केचन खहितकरणसमयेऽसावधानाः पश्चात्पश्चात्तापपराः संग्राह्याः । तेन दरिद्रकुटुंबवणिक्द्वयविद्याधरद्वयदेवदत्तचिन्तामणिदृष्टान्तानां ग्रहणम् । प्रमादपारवश्यात् अकृतसुकृतो मनुष्यभवभ्रष्टो दुर्गतिं गत एतैर्दृष्टान्तैः पश्चात्तापकर्ता भविष्यसि अतः अस्मिन्नेव भवे तथा सुकृतं कुरु यथा अग्रेऽपि सदा आनन्दोदयो भविता। उरभ्रादिकथाः परिशिष्टतो ज्ञेयाः । १० द्विपो गजः । द्विषारिः सिंहः । पतंगभृंगादिकथा परिशिष्टे अवलोकनीया ।

दुःखं यथा बहुविधं सहसेऽप्यकामः
कामं तथा सहसि चेत्करुणादिभावैः ।
अल्पीयसापि तव तेन भवान्तरे स्या-
दात्यन्तिकी सकलदुःखनिवृत्तिरेव ॥ १३७ ॥

प्रगल्भसे कर्मसु पापकेष्वरे यदाशया शर्म न तद्धिनानितम् ।
विभावयंस्तच्च विनश्वरं द्रुतं बिभेषि किं दुर्गतिदुःखतो नहि ॥ १३८ ॥

कर्माणि रे जीव करोषि तानि यैस्ते भविष्यो विपदो ह्यनन्ताः ।
ताभ्यो भिया तद्दधसेऽधुना किं सम्भाविताभ्योऽपि भृशाकुलत्वम् १३९

ये पालिता वृद्धिमिताः सहैव स्निग्धा भृशस्नेहपदं च ये ते ।
यमेन तानप्यदयं गृहीतान् ज्ञात्वापि किं न त्वरसे हिताय ॥ १४० ॥

यैः क्लिश्यसे त्वं धनबन्धुपत्ययशःप्रभुत्वादिभिराशयस्थैः ।
कियानिह प्रेत्य च तैर्गुणस्ते साध्यः किमायुश्च विचारयैवं ॥ १४१ ॥

किमु मुह्यसि गत्वरैः पृथक् कृपणैर्बन्धुवपुःपरिग्रहैः ।
विमृशस्व हितोपयोगिनोऽवसरेऽस्मिन् परलोकपान्थ रे ॥ १४२ ॥

सुखमास्से सुखं शेषे भुंक्षे पिबसि खेलसि ।
न जाने त्वद्यतः पुण्यैर्विना ते किं भविष्यति ॥ १४३ ॥

शीतात्तापान्मक्षिकाकर्त्तृणादिस्पर्शाद्युत्थात् कष्टतोऽल्पाद्बिभेषि ।
तास्तैश्चैभिः कर्मभिः स्वीकरोषि श्वभ्रादीनां वेदना धिग् धियं ते ११४

---

१ निर्जरावाञ्छारहितः । २ निर्जरावाञ्छासहितं यथा स्यात् तथा । ३ मैत्रीप्रमोदकारुण्यमाध्यस्थ्यपरिणामैः । ४ पुनः प्रादुर्भावरहिता दुःखोच्छित्तिः । ५ पापजनकेषु । ६ यस्य शर्मणः सुखस्य आशया । ७ अनित जीवितं विना । ८ दध धारणे इत्यस्य दधसे इति प्रयोगः । ९ हितप्रवर्तनाहितनिवर्तनादिना रक्षिताः । १० स्वचित्तकल्पितैः । ११ किं कियन्मात्रम् । १२ भिन्नभिन्नस्थानगमनशीलैः । १३ तुच्छैः । १४ कर्त्तृणादि इत्यत्र आदिपदात् कर्करादिकर्कशवस्तुपरिग्रहः । १५ स्पर्शादि इत्यत्र आदिपदात् दूरसदुर्गन्धादिपरिग्रहः । १६ प्रत्यक्षतः क्रियमाणैः पापव्यापारैः ।

कैंचित् कषायैः क्वचन प्रमादैः कदाग्रहैः क्वापि च मत्सरांद्यैः ।
आत्मानमात्मन् कलुषीकरोषि विभेषि धिङ् नो नरकादधर्मा ॥ १४५ ॥

धर्मशुद्ध्यधिकारः ।

भवेद्भवापायविनाशनाय तमज्ञ धर्मं कलुषीकरोषि किम् ।
प्रमादमानोपधिमत्सरादिभिर्न मिश्रितं[10] ह्यौषधमामयोपहम् ॥ १४६ ॥
शैथिल्यमात्सर्यकदाग्रहकुधोऽनुतापदंभाविधिगर्वाणि च ।
प्रमादमानौ कुगुरुः कुसंगतिः क्षार्धार्थिता वा सुकृते मला इमे ॥ १४७ ॥
यथा तवेष्टा स्वगुणप्रशंसा तथा परेषामिति मत्सरोज्झी ।
तेषामिमां सन्ततु यत्नमेर्थास्तां नेष्टदानादि विनेष्टलाभः ॥ १४८ ॥
जनेषु गृह्णत्सु गुणान् प्रमोदसे ततो भवित्री गुणरिक्तता तव ।
गृह्णत्सु दोषान् परितप्यसे चेद्[20] रे भवन्तु दोषास्त्वयि सुस्थिरास्ततः[21] ॥ १४९ ॥
प्रमोदसे स्वस्य यथान्यनिर्मितैः स्तवैस्तथा चेत् प्रतिपन्थिनामपि ।
विगर्हणैः स्वस्य यथोपतप्यसे तथा रिपूणामपि चेत्ततोऽसि वित् ॥ १५० ॥
स्तवैर्यथा स्वस्य विगर्हणैश्च प्रमोदतापौ भजसे तथा चेत् ।
इमौ परेषामपि तैश्चतुर्व्वप्युदासतां वासि ततोऽर्थवेदी ॥ १५१ ॥
भवेन्न कोऽपि स्तुतिमात्रतो गुणी स्यात्या न ब्रह्मापि हितं परत्र च ।
तदिच्छुरीर्ष्यादिभिरायतिं ततो मुधाभिमानग्रहिलो निहंसि किम् ॥ १५२ ॥

---

१ परीषहसहनादौ । २ क्रियानुष्ठानादौ । ३ शास्त्रार्थप्ररूपणादौ । ४ समत्सरादयः इति वा पाठः । ५ मत्सरादयः कदाग्रहैः मिथ्याभिनिवेशाद्यैरसद्ग्रहैः । अत्र आद्यपदेन शास्त्रश्रवणादौ मौढ्यादिभिराशातनाकरणेन । ६ धर्मो देशविरतिलक्षणः सर्वविरतिलक्षणः सम्यक्त्वलक्षणो दानादिलक्षणो वा न विद्यते यस्य सः । ७ भवः संसारः तत्संबंधिनो येऽपाया जन्मजरामरणलक्षणा उपद्रवास्तेषां विध्वंसाय । ८ माया । ९ आदिपदात् लोभप्रभृतिभिः । १० रोगोत्पादकद्रव्येण सम्पृक्तं रोगापहारि भेषजं । ११ रोगोच्छेदकं । १२ क्रियाया शिथिलता । १३ शास्त्रोक्तमर्यादया प्रवर्तनं विधिस्तदभावोऽविधिः । १४ मयेदं सुकृतं कृतं ततोऽहं महानिति स्वयं चिन्तनं, लोके महत्त्वप्रामाण्ये परेषां पुरस्तात् प्रकाशनं वा । १५ सम्यग्ज्ञानदर्शनचारित्ररहितो धर्माचार्यः । १६ परकृतस्वप्रशंसासूपहालता । १७ परेषां गुणप्रशंसाम् । १८ सम्यक्प्रकारेण विस्तारय । १९ स्वगुणप्रशंसाम् । २० चेद् इति वा पाठः । २१ स्तव इति वा पाठः । २२ निरर्थकाहंकारग्रस्तः

सृजन्ति[1] के के न बहिर्मुखा[2] जनाः प्रमादमात्सर्यकुबोधविप्लुताः[3] ।
दानादिधर्माणि[4] मलीमसान्यमून्युपेक्ष्य शुद्धं सुकृतं चराण्वपि ॥ १५३ ॥

आच्छादितानि सुकृतानि यथा दधन्ते[5]
सौभाग्यमत्र न[6] तथा प्रकटीकृतानि ।
व्रीडाननाननसरोजसरोजनेत्रा-
वक्षःस्थलानि कलितानि यथा दुकूलैः ॥ १५४ ॥

स्तुतैः श्रुतैर्वाप्यपरैर्निरीक्षितैर्गुणस्तवात्मन् सुकृतैर्न कश्चन ।
फलन्ति नैव प्रकटीकृतैर्भुवो[7] द्रुमा हि मूलैर्निपतन्त्यपि त्वधः ॥ १५५ ॥

तपःक्रियावश्यकदानपूर्जनैः शिवं न गन्ता गुणमत्सरी जनः ।
अपथ्यभोजी न निरामयो भवेद्रसायनैरप्यतुलैर्यदातुरः ॥ १५६ ॥

मन्त्रप्रभारत्नरसायनादिनिदर्शनादल्पमपीह शुद्धम्[8] ।
दानार्चनावश्यकपोषधादि[9] महाफलं[10] पुण्यमितोऽन्यथान्यत्[11] ॥ १५७ ॥

दीपो यथाल्पोऽपि तमांसि हन्ति लवोऽपि रोगान् हरते सुधायाः ।
तृणं दहत्याशु कणोऽपि चाग्नेर्धर्मस्य लेशोऽप्यमलस्तथांहः[12] ॥ १५८ ॥

भावोपयोगशून्याः[13] कुर्वन्नावश्यकीः[14] क्रियाः सर्वाः ।
देहक्लेशं लभसे फलमाप्स्यसि नैव पुनरासाम्[15] ॥ १५९ ॥

देवगुरुतत्त्वशुद्ध्यधिकारः ।

तत्त्वेषु[16] सर्वेषु गुरुः प्रधानं हितार्थिधर्मा[17] हि तदुक्तिसाध्याः ।
श्रयंस्तमेवेत्यपरीक्ष्य मूढ धर्मप्रयासान् कुरुषे वृथैव ॥ १६० ॥

---

१ के के न कुर्वन्ति अपि तु प्रायः सर्वेऽपि कुर्वन्तीत्यर्थः । २ बाह्यदृष्टयः प्राकृतजनाः । ३ उपद्रुताः । ४ धर्मशब्दोऽत्र नपुंसकलिंगः । "तानि धर्माणि प्रथमान्यासन्" इतिवत् प्रयोगः । ५ दधि धारणे इत्यस्य प्रथमपुरुषबहुवचनप्रयोगः । ६ "धर्मः क्षरति कीर्तनात्" । ७ पृथिव्याः । ८ सामायिकचतुर्विंशतिस्तवादीनि तैः । ९ आदिपदात् दिव्यास्त्रादिपरिग्रहः । १० मत्सरादिदोषरहित पुण्यम् । ११ पोषधश्चाहारशरीरसंस्काराब्रह्मसावद्यव्यापारनिवृत्तिरूपः । १२ स्वर्गापवर्गादिप्राप्तिलक्षणं । १३ इत उक्तप्रकारात् शुद्धधर्मादन्यथा विपरीत बहुपि अशुद्ध पुण्य अन्यत् अल्पफलं अफलं वा । १४ मात्सर्यादिदोषरहितः । १५ चित्तोत्साहः । १६ आवश्यिकीः इति वा पाठः । १७ देवगुरुधर्मलक्षणेषु । १८ हितार्थधर्मा इति वा पाठः ।

भवी[1] न धर्मैरविधिप्रयुक्तैर्गमी शिवं येषु गुरुर्न शुद्धः ।
रोगी हि कल्यो[2] न रसायनैस्तैर्येषां प्रयोक्ता भिषगेव मूढः ॥ १६१ ॥
समाश्रितस्तारकबुद्धितो यो यस्यास्त्यहो मज्जयिता स एव ।
ओघं तरीता विषयं कथं स तथैव जन्तुः कुगुरोर्भवाब्धिम् ॥ १६२ ॥
गजाश्वपोतोक्षरथान्[3] यथेष्टपदाप्तये भद्र निजान् परान् वा ।
भजन्ति विज्ञाः सुगुणान् भजैवं शिवाय शुद्धान् गुरुदेवधर्मान् ॥ १६३ ॥
फलाद्वृथाः स्युः कुगुरूपदेशतः कृता हि धर्मार्थमपीह सूद्यमाः ।
तद्दृष्टिरागं परिमुच्य भद्र हे गुरुं विशुद्धं भज चेद्धिताऽर्थ्यसि ॥ १६४ ॥

न्यस्ता मुक्तिपथस्य बाधकतया[4] श्रीवीर ये[5] प्राक् त्वया
लुण्टाकास्त्वदृतेऽभवन्[6] बहुतरास्त्वच्छासने ते कलौ ।
विभ्राणा यतिनाम तत्तनुधियां सुष्णन्ति पुण्यश्रियः
फूत्कुर्मः किमराजके ह्यपि तलारक्षा[7] न किं दस्यवः ॥ १६५ ॥

माध्यस्थशुद्धैर्गुरुदेवधर्मैर्धिग् दृष्टिरागेण[8] गुणानपेक्षः ।
अमुत्र शोचिष्यसि तत्फले[9] तु कुपथ्यभोजीव महामयार्तः ॥ १६६ ॥
नाम्रं सुसिक्तोऽपि ददाति निम्बकः पुष्टा रसैर्वन्ध्यगवी[10] पयो न च ।
दुःस्थो नृपो नैव सुसेवितः श्रियं[11] धर्मं[12] शिवं[13] वा कुगुरुर्न सेवितः ॥१६७॥
कुलं न जातिः[14] पितरो गणो[15] वा विद्या[16] च बन्धुश्च गुरुर्धनं[17] वा ।
हिताय जन्तोर्न परं च किञ्चित् किन्त्वार्हताः सद्गुरुदेवधर्माः ॥ १६८ ॥
माता पिता स्वः[18] सुगुरुश्च तत्त्वात्[19] प्रबोध्य यो योजति शुद्धधर्मे ।

---

१ प्राणी । २ नीरोगः । ३ उक्षाणो बलीवर्दाः । ४ स्वर्गापवर्गादिप्राप्तिफलमाश्रित्य । ५ तस्मात् स्वस्वदर्शनदृष्टिराग । ६ स्थापिताः । ७ प्रवर्तकतया । ८ हे वर्धमानस्वामिन् । ९ सुधर्मादयः । १० मार्गग्राहकतस्कराः । ११ राजनियुक्तनगरोपद्रवनिवारकाः कोट्टपालाः । १२ स्वदर्शनानुरागेण । १३ कुगुर्वादिसेवनजनितमदफले दुर्गतिदुःखानुभवलक्षणे । १४ वन्ध्या गौः वन्ध्यगवी । गोरवङ् समासे स्त्रियां ङीप् च । १५ स्वर्गादिप्राप्तिबीजं । १६ अपवर्गम् । १७ मातृवशः । १८ पितृवशः । १९ महाजनादिसमूहः । २० तर्कविद्या मन्त्रविद्या वा । २१ कुलगुरुर्विद्यागुरुर्वा । २२ स्वकीयः । २३ परमार्थतः । तत्त्वमार्गोपदेष्टा भवतीति सर्वत्र योज्यम् ।

न तत्समोऽरिः क्षिपते भवाब्धौ यो धर्मविघ्नादिकृतेश्च जीवम् ॥१६९॥

दाक्षिण्यलज्जे गुरुदेवपूजा[3] पित्रादिभक्तिः सुकृताभिलाषः ।
परोपकारव्यवहारशुद्धी नृणामिहामुत्र च सम्पदे स्युः ॥ १७० ॥

जिनेष्वभक्तिर्यमिनामवज्ञा कर्मस्वनौचित्यमधर्मसंगः ।
पित्राद्युपेक्षा परवञ्चनञ्च सृजन्ति पुंसां विपदः समन्तात् ॥ १७१ ॥

भक्त्यैव नार्चसि जिनं सुगुरोश्च धर्मं
नाकर्णयस्यविरतं विरतीर्न धत्से ।
सार्थं निरर्थमपि च प्रचिनोष्यघानि
मूल्येन केन तदमुत्र समीहसे शम् ॥ १७२ ॥

चतुष्पदैः सिंह इव स्वजात्यैर्मिलन्निमांस्तारयतीह कश्चित् ।
सहैव तैर्मज्जति कोऽपि दुर्गे शृगालवच्चेत्यमिलन् वरं सः ॥ १७३ ॥

पूर्णे तटाके तृषितः सदैव भूतेऽपि गेहे क्षुधितः स मूढः ।
कल्पद्रुमे सत्यपि ही दरिद्रो गुर्वादियोगेऽपि हि यः प्रमादी ॥ १७४ ॥

न धर्मचिन्ता गुरुदेवभक्तिर्येषां न वैराग्यलवोऽपि चित्ते ।
तेषां प्रसूक्लेशफलः पशूनामिवोद्भवः स्यादुदरम्भरीणाम् ॥ १७५ ॥

न देवकार्ये न च संघकार्ये येषां धनं नश्वरमाशु तेषाम् ।
तदर्जनाद्यैर्वृजिनैर्भवाब्धौ पतिष्यतां किं तवलम्बनं स्यात् ॥ १७६ ॥

यतिशिक्षोपदेशाधिकारः ।

ये तीर्णा भववारिधिं मुनिवरास्तेभ्यो नमस्कुर्महे
येषां नो विषयेषु गृध्यति मनो नो वा कषायैः प्लुतं ।

---

१ सुकृतान्तरायनिष्पादनात् । आदिपदात् उन्मार्गप्रवृत्तिकृतेः । २ यो जीवं प्राणिनम् । ३ अर्चा । सा च द्रव्यभावभेदाभ्यां द्विधा । तत्र द्रव्यपूजा पुष्पाहारादिभिः भावपूजा च स्तुतिस्तोत्रादिभिः । ४ आस्रवादिभ्यो निवृत्तीः । ५ सप्रयोजनं । ६ निष्प्रयोजनं । ७ सुख स्वर्गापवर्गादिज । ८ सुगुरुः । ९ कुगुरुः । १० अमिलन् वरं सः (कुगुरुः) । सिंहशृगालकथा परिशिष्टतोऽवगन्तव्या । ११ साधुसाध्वीश्रावकश्राविकासमुदायः संघः । १२ तु इति वितर्के । १३ आसक्तिं याति ।

रागद्वेषविमुक्[1] प्रशान्तकलुषं[2] साम्यासशर्माद्वयं
नित्यं खेलति चात्मसंयमगुणक्रीडे[3] भजद्भावनाः ॥ १७७ ॥
स्वाध्यायमाधित्ससि नो प्रमादैः शुद्धा न गुप्तीः[4] समितीश्च[5] धत्से ।
तपो द्विधा नार्जसि देहमोहादल्पेऽपि हेतौ दधसे[6] कषायान् ॥ १७८ ॥
परीषहान्[7] नो सहसे न चोपसर्गान्न[8] शीलांगधरोऽपि[9] चासि ।
तन्मोक्ष्यमाणोऽपि भवाब्धिपारं मुने कथं यास्यसि वेषमात्रात् ॥ १७९ ॥

युग्मम्

आजीविकार्थमिह यद्यतिवेषमेव[10]
धत्से चरित्रममलं[11] न तु कष्टभीरुः[12] ।
तद्वेत्सि किं न न विभेति जगज्जिघृक्षु-[13]
र्मृत्युः कुतोऽपि नरकश्च न वेषमात्रात् ॥ १८० ॥
वेषेण माद्यसि यतेश्चरणं विनात्मन्
पूजां च वाञ्छसि जनाद्बहुधोपधिं[14] च ।
मुग्धप्रतारणभवे[15] नरकेऽसि गन्ता
न्यायं बिभर्षि तदजागलकर्तरीयम्[16] ॥ १८१ ॥
जानेऽस्ति संयमतपोभिरमीभिरात्म-[17]
न्नस्य प्रतिग्रहभरस्य[18] न निष्क्रयोऽपि[19] ।

---

१ प्रकर्षेण शान्त निःसत्ताकीभूतं कलुषं पापकर्म यत्र तत्तथा । २ उद्याने । चास्त-संयमगुणाक्रीडे इति वा पाठः । ३ शुद्धा निरतिचारा गुप्तीः मनोगुप्त्यादिकाः । ४ ईर्या-समित्यादिकाः । ५ ममेदं शरीरं मा दुर्बलं भवतु इति मौढ्यात् । ६ दधि धारणे इत्यस्य मध्यमपुरुषैकवचनस्य रूपम् । ७ परीषहान् क्षुत्तृट्प्रमुखान् । ८ देवमनुष्यतिर्यकृतान् परिभवान् । ९ अष्टादशसहस्रशीलांगरथधारकोऽपि । १० मुक्तिं गमिष्यन् । ११ रजोहरणादिलिंगं । १२ निरतिचारं । १३ उपसर्गपरीषहसहनकष्टभीरुः । * जगज्जिघत्सुरिति समीचीनतरः पाठः । १४ वस्त्रपात्रलक्षणं । १५ निर्विवेकलोकवंचनोत्पन्ने नरके दुर्गतिरूपे । १६ अजागलकर्तरीयन्यायः परिशिष्टतो ज्ञेयः । १७ शुद्धिरहितैः सातिचारैः लोकरंजनार्थं क्रियमाणैः संयमतपोभिः । १८ मनोवाञ्छिताशनपानवस्त्रपात्रपीठफलकवसत्यादिग्रहणरूपस्य । १९ निष्क्रयो भाटकमपि नास्ति कुतस्तन्मूल्यस्य संभावनेतिभावः । अत्र तदेति गम्यम् ।

किं दुर्गतौ निपततः शरणं तवास्ते
सौख्यञ्च दास्यति परत्र किमित्यवेहि ॥ १८२ ॥
किं लोकसत्कृतिनमस्करणार्चनाद्यै
रे मुग्ध तुष्यसि विनापि विशुद्धयोगान्[1] ।
कृन्तन् भवान्धुपतने तव यत् प्रमादो
बोधिद्रुमाश्रयमिमानि[2] करोति पर्शून् ॥ १८३ ॥
गुणांस्तेवाश्रित्य[3] नमन्त्यमी जना ददत्युपध्यालयभैक्ष्यशिष्यकान् ।
विना गुणान् वेषमृषेर्बिभर्षि चेत् ततष्ठकानां[4] तव भाविनी गतिः ॥ १८४॥
नाजीविकाप्रणयिनीतनयादिचिन्ता[5]
नो राजभीश्च भगवत्समयश्च[6] वेत्सि[7] ।
शुद्धे तथापि चरणे यतसे न भिक्षो
तत्ते प्रतिग्रहभरो नरकार्थमेव ॥ १८५ ॥
शास्त्रज्ञोऽपि दृढव्रतोपि गृहिणीपुत्रादिबन्धोज्झितोऽ-
प्यंगी यद्यतते प्रमादवशगो न प्रेत्यसौख्यश्रिये ।
तन्मोहैद्विषतस्त्रिलोकजयिनः[8] काचित्[9] परा दुष्टता
बद्धायुष्कतया[10] स वा नरपशुर्नूनं गमी दुर्गतौ ॥ १८६ ॥
उच्चारयस्यनुदिनं न करोमि सर्वं
सावद्यमित्यसकृदेतदथो करोपि[11] ।
नित्यं मृषोक्तिजिनवञ्चनभारितात्त-[12]
त्सावद्यतो[13] नरकमेव विभावये ते ॥ १८७ ॥

---

१ सुप्रवृत्तमनोवाक्काययोगान् विना । २ तव बोधिः सम्यक्त्वावाप्तिः स एव द्रुमो वृक्षः स एव आश्रयः पतत्समये अवलबन तम् । ३ ज्ञानदर्शनचारित्रादिगुणवंतं त्वां ज्ञात्वा । ४ अत्र ठक इति लोकप्रसिद्धो देशी शब्दः । ५ आजीविका उदरपूरणोपाय. । प्रणयिनी कलत्र । चिन्ता मानसपीडा । अत्र आदिपदात् हट्टगृहादिकरणकुटुबभरणपोषणादिपरिग्रहः । ६ नो राजभीर्धरसि वागमपुस्तकानि इति वा पाठः । ७ जैनसिद्धान्तम् । ८ पारभविकसुखसंपदे । ९ मोहवैरिणः । १० अनिर्वाच्या । ११ निकाचितनरकायुष्कतया । १२ भगवन् सर्वं सावद्य यावज्जीव न करोमि इति भणित्वा पुनस्तत्करणेन भगवद्वंचन तेन भारितात् । भारः सञ्जातोऽस्येति भारितः तस्मात् । १३ सावद्यव्यापारात् ।

वेषोपदेशाद्युपधिप्रतारिता ददत्यभीष्टान्नृजवोऽधुना जनाः ।
भुंक्षे च शेषे च सुखं विचेष्टसे भवान्तरे ज्ञास्यसि तत्फलं पुनः॥१८८॥

आजीविकादिविविधार्तिभृशानिशार्ताः
कृच्छ्रेण केऽपि महतैव सृजन्ति धर्मान् ।
तेभ्योऽपि निर्दय जिवृक्षसि सर्वमिष्टं
नो संयमे च यतसे भविता कथं ही ॥ १८९ ॥

आराधितो वा गुणवान् स्वयं तरन्
भवाब्धिमस्मानपि तारयिष्यति ।
श्रयन्ति ये त्वामिति भूरिभक्तिभिः
फलं तवैषां च किमस्ति निर्गुण ॥ १९० ॥

स्वयं प्रमादैर्निपतन् भवाम्बुधौ कथं स्वभक्तानपि तारयिष्यसि ।
प्रतारयन् स्वार्थमृजून् शिवार्थिनः स्वतोऽन्यतश्चैव विलुप्यसेऽहसा॥१९१॥

गृह्णासि शय्याहृतिपुस्तकोपधीन् सदा परेभ्यस्तपसस्त्विय स्थितिः ।
तत्ते प्रमादाद्धरितात् प्रतिग्रहैर्ऋणार्णमग्नस्य परत्र का गतिः ॥ १९२ ॥

न कापि सिद्धिर्न च तेऽतिशायि मुने क्रियायोगतपःश्रुतादि ।
तथाप्यहंकारकदर्थितस्त्वं ख्यातीच्छया ताम्यसि धिङ् मुधा किम्॥१९३॥

हीनोऽप्यरे भाग्यगुणैर्मुधात्मन् वाञ्छन्स्तवार्चाद्यनवाप्तुवंश्च ।
ईर्ष्यन् परेभ्यो लभसेऽतितापमिहापि याता कुगतिं परत्र ॥ १९४ ॥

---

१ वेषश्च यतिलिंगं उपदेशश्च दानादिषु प्रवृत्त्युत्साहजनकं वचस्तौ आदौ येषां ते तथा [आदिपदात् वाह्यसमितिगुप्तिपालनदर्शनादिपरिग्रहः] ते च ते उपधयश्च दभास्तैः प्रतारिताः । २ वर्तमानभवे । ३ सुख यथा स्यात्तथा । ४ जनवंचनजनितसुखानुभवफल नरकादिवेदनालक्षणं । ५ महानुभावाः । ६ कुर्वन्ति । ७ दानादिधर्मान् । ८ सेवन्ते । ९ आयतिहितलक्षण किमस्ति । १० आराध्यस्य तव । ११ आराधकानाम् । १२ आत्मसकाशात् प्रमादाचरणैश्च । १३ पुनरन्यतः परतः शिवार्थिवचनादिना जनितेन । १४ विमोह्यसे । १५ वसतिः । १६ आहारः । १७ ज्ञानोपकरणादि । १८ वस्त्रपात्रादि । १९ तपसस्त्विय स्थितिः तदकरणलक्षणा व्यवस्था । २० तत्तस्मात् प्रतिग्रहैर्भरितात् निचितात् प्रमादात् विषयकषायादेर्हेतोः । २१ अतिशयेन ऋण तत्र मग्नस्य । चारित्रं गृहीत्वा प्रमादसेवनमेकं ऋणं अपरं च तपः करणमन्तरेण परेभ्यः शय्यादिप्रतिग्रहकरणमिति भावः । २२ अभिमानविडंवितः । २३ आदिपदात् अभ्युत्थानासनदानादिपरिग्रहः ।

गुणैर्विहीनोऽपि जनैनतिस्तुतिप्रतिग्रहान् यन्मुदितः प्रतीच्छसि ।
लुलायगोऽश्वोष्ट्रखरादिजन्मभिर्विना ततस्ते भविता न निष्क्रयः ॥१९५॥
गुणेषु नोच्चच्छसि चेन्मुने ततः प्रगीयसे यैरपि वन्द्यसेऽर्च्यसे ।
जुगुप्सितां प्रेत्य गतिं गतोऽपि तैर्हसिष्यसे चाभिभविष्यसेऽपि वा॥१९६॥
दानमाननुतिवन्दनापरैर्मोदसे निकृतिरञ्जितैर्जनैः ।
न त्ववैषि सुकृतस्य चेल्लवः कोऽपि सोऽपि तव लुंट्यते हि तैः ॥१९७॥
भवेद्गुणी मुग्धकृतैर्नहि स्तवैर्न ख्यातिदानार्चनवन्दनादिभिः ।
विना गुणान्नो भवदुःखसंक्षयस्ततो गुणानर्जय किं स्तवादिभिः॥१९८॥
अध्येषि शास्त्रं सदसद्विचित्रालापादिभिस्ताम्यसि वा समायैः ।
येषां जनानामिह रञ्जनाय भवान्तरे ते क्व मुने क्व च त्वम् ॥ १९९ ॥
परिग्रहं त्वं व्यजहा गृहादेस्तत् किं नु धर्मोपकृतिच्छलात्तम् ।
करोषि शय्योपधिपुस्तकादेर्गरोऽपि नामान्तरतोऽपि हन्ता ॥ २०० ॥
परिग्रहात् स्वीकृतधर्मसाधनाभिधानमात्रात् किमु मूढ तुष्यसि ।
न वेत्सि हेम्नाप्यतिभारिता तरी निमज्जयत्यंगिनमम्बुधौ द्रुतम् ॥ २०१ ॥

---

१ प्रणामः । २ लुलायो महिषः । आदिपदात् भारवाहकगजमनुजादिपरिग्रहः । ३ ज्ञानदर्शनचारित्रलक्षणेषु श्रमणगुणेषु । ४ अत्र अपिशब्द एवकारार्थे. । ५ निकृतिर्मलिनवेषवहनादिलक्षणामाया तया रञ्जिताः स्ववशीकृतास्तैः । ६ भद्रकजननिष्पादितैः स्तवैः आरोपितगुणप्रशंसनैः । ७ आदिपदादभ्युत्थानासनदानादिपरिग्रहः । ८ ज्ञानदर्शनचारित्रलक्षणान् । ९ सच्छास्त्र धर्मशास्त्र । असच्छास्त्रं कामशास्त्र ज्योतिःशास्त्र वा । १० आदिपदात् धर्मलाभाशीर्वाददानादिपरिग्रहः । ११ सकपटैः । येषां जनानां रंजनाय त्वमेतावदिह भवे करोषि ते जनाः स्वकृतकर्मवशगाः परभवे कस्यामपि गतौ गमिष्यन्ति त्वं च कस्यामपि गमिष्यसि इति किं जनरंजनेन इति भावः । १२ चेद् इति वा पाठः । १३ अल्पाक्षीः । १४ अत्र आदिपदात् द्विपदचतुष्पदादिपरिग्रहः । १५ नु वितर्के । १६ धर्मोपकरणमिषेण वसतिवस्त्रपात्रज्ञानोपकरणादेस्तं परिग्रहं करोषि किम् । १७ यथा मधुरादिनामान्तरेण प्रतिपादितो गरो वत्सनागादिर्हन्ता भवति तथा मूर्च्छया शय्यादिपरिग्रहो धर्मोपकरणमिति नाम्नापि हन्ता भवति । १८ स्वीकृतमंगीकृतं धर्मसाधनमित्यभिधानमात्रं नाममात्र यस्य स तथा तस्मात् । परिग्रहादित्यस्य विशेषणम् ।

[1]येऽहः[2]कषायकलिकर्मनिबन्धभाजनं
स्युः पुस्तकादिभिरपीहितधर्मसाधनैः ।
तेषां रसायनवरैरपि सर्पदामयै-
रार्तात्मनां गदहृतेः सुखकृन्नु किं भवेत् ॥ २०२ ॥
रक्षार्थं खलु संयमस्य गदिता येऽर्था यतीनां जिनै-
र्वासःपुस्तकपात्रकप्रभृतयो धर्मोपकृत्यात्मकाः ।
मूर्च्छन्मोहवशात्त एव कुधियां संसारपाताय धिक्
स्वं स्वस्यैव वधाय शस्त्रमधियां यद्दुष्प्रयुक्तं भवेत् ॥ २०३ ॥
संयमोपकरणच्छलात् परान् भारयन् यदसि पुस्तकादिभिः ।
गोखरोष्ट्रमहिषादिरूपभृत् तच्चिरं त्वमपि भारयिष्यसे ॥ २०४ ॥
वस्त्रपात्रतनुपुस्तकादिनः शोभया न खलु संयमस्य सा ।
आदिमा च ददते भवं परा मुक्तिमाश्रय तदिच्छयैकिकाम् ॥ २०५ ॥
शीतातपाद्यान्न मनागपीह परीषहांश्चेत् क्षमसे विसोढुम् ।
कथं ततो नारकगर्भवासदुःखानि सोढासि भवान्तरे त्वम् ॥ २०६ ॥
मुने न किं नश्वरमस्वदेहमृत्पिण्डमेनं सुतपोव्रतार्घैः ।

---

१ यतयः । २ अंहः लिखनारंभादिजन्य पापं । कषायाश्च मूर्च्छोत्पन्नाः क्रोधमानमायालोभाः । कलिश्च कषायप्रभवो वाग्वादः । कर्माणि च कलहप्रभवाणि अशुभकर्माणि । तेषां निबन्धो निबन्धनं बीजं मूर्च्छा तस्य भाजन । ३ ईहितो वाञ्छितो धर्मो ज्ञानादिस्तस्य साधनैर्हेतुभिर्धर्मोपकरणैः पुस्तकादिभिः । ४ रोगहरणात् । ५ नु वितर्के । ६ चारित्रस्य । ७ अत्र प्रभृतिपदेन स्थपनिकास्थापनाचार्यादिपरिग्रहः । ८ समुच्छ्रायं गच्छन् वृद्धिं गच्छन् । मूर्च्छामोहवशात् इति पाठे तु मूर्च्छा धर्मोपकरणेषु गृद्धिस्तज्जनितो मोहो मौढ्यं तद्वशात् । ९ भारवाहकान् । १० भारवहनविषयीकुर्वन् । ११ आदिपदात् गजतुरगादिपरिग्रहः । १२ शोभा । १३ ता तदत्र परिहाय संयमे किं यते न यतसे शिवार्थ्यपि ॥ इति वा उत्तरार्धपाठः । पाठांतरे स्थितस्य तां इत्यस्य वस्त्रादिशोभां इत्यर्थो ज्ञेयः । १३ आदिमा प्रथमा वस्त्रपात्रतनुपुस्तकादिशोभा । १४ अत्र ददि दाने इत्यस्य प्रथमपुरुषैकवचनस्य रूपम् । १५ द्वितीया संयमस्य शोभा । १६ यथेच्छम् । एकिकाम् एका एव एकिका तां वस्त्रादिशोभा संयमशोभां वा आश्रय । १७ अस्वः अनात्मीयः परभवे सहगमनाभावात् । देह एव मृत्पिण्डस्तम् । १८ आद्यपदेन उपसर्गपरीषहादिसहनपरिग्रहः ।

निपीड्य भीतीर्भवदुःखराशेर्हित्वात्मसौ[1]च्छैवसुखं करोषि ॥ २०७ ॥
यदत्र कष्टं चरणस्य[3] पालने परत्र तिर्यङ्नरकेषु यत् पुनः ।
तयोर्मिथः सप्रतिपक्षता[5] स्थिता विशेषदृष्ट्यान्यतरज्जहीहि तत्[6] ॥ २०८ ॥
शमत्र यद्विन्दुरिव प्रमोदजं परत्र यच्चाब्धिरिव द्युमुक्तिगम्[8] ।
तयोर्मिथः सप्रतिपक्षता स्थिता विशेषदृष्ट्यान्यतरद्गृहाण ॥ २०९ ॥
सह तपोयमसंयमयत्नणां स्ववशतासहने हि गुणो[10] महान् ।
परवशस्त्वतिभूरि सहिष्यसे न च गुणं बहुमाप्स्यसि कञ्चन ॥ २१० ॥
अणीयसा साम्यनियत्नणाभुवा मुनेऽत्र कष्टेन चरित्रजेन च ।
यदिक्षयो दुर्गतिगर्भवासगासुखावलेस्तत् किमवापि नार्थितम् ॥ २११ ॥
त्यज स्पृहां स्वैःशिवशर्मलाभे स्वीकृत्य तिर्यङ्नरकादि[13] दुःखम् ।
सुखाणुभिश्चेद्विषयादिजातैः सन्तोष्यसे संयमकष्टभीरुः ॥ २१२ ॥
समग्रचिन्तार्तिहृतेरिहापि यस्मिन् सुखं स्यात् परमं रताना[14]म् ।
परत्र चेन्द्रादिमहोदयश्रीः प्रमाद्यसीहापि कथं चरित्रे ॥ २१३ ॥
महातपोध्यानपरीषहादि[16] न सत्त्वसाध्यं यदि धर्तुमीशः[17] ।
तद्भावना[18]ः किं समितीश्च गुप्तीर्धत्से[19] शिवार्थिन् न मनःप्रसाध्याः[20] ॥२१४॥

---

१ आत्मायत्त किं न करोषि । २ मोक्षसंबधि सुखं । ३ नियत्नणा या चरणेऽत्र तिर्यक्स्त्रीगर्भकुंभीनरकेषु या च । तयोर्मिथः सप्रतिपक्षभावाद्विशेषदृष्ट्यान्यतरां गृहाण ॥ इति पाठान्तरम् । ४ अत्र इहभवे चारित्रस्य । ५ परस्परविरोधिता । ६ विवेकदृष्ट्या गौरवलाघवपर्यालोचनरूपया । पाठांतरे स्थितस्य पदस्य व्याख्या यथा—नियत्नणा गाढव्रतबन्धनेनावस्थानरूपा । ७ विषयादिजनित । ८ स्वर्गापवर्गग । ९ यत्र स्वर्गापवर्गग सुख न तत्र प्रमादजं सुखमितिरूपा विरोधिता । १० मोक्षप्राप्तिलक्षणो गुणः । शिवं गुणः इति पाठान्तरम् । ११ तु पुनः । १२ स्वर्गापवर्गसुखप्राप्तौ । १३ आदिपदात् मनुष्यभावगतगर्भवासजरामरणादिपरिग्रहः । १४ हरणात् । अभावादित्यर्थः । "न च राजभयं न च चौरभय । वरकीर्तिकरं नरदेवहित ॥ इहलोकसुख परलोकहितं । श्रमणत्वमिद रमणीयतरम् ॥" १५ महातपोध्यानपरीषहादि चारित्रमित्यर्थः । आदिपदात् उपसर्गपरिग्रहः । १६ सत्वेन मानसशारीरपराक्रमेण साध्यं गम्यम् । १७ कर्तुम् । १८ अनित्यताद्या बोधिपर्यन्ता द्वादश भावनाः । भाव्यते धर्म्यध्यानेन संस्क्रियते आत्मा याभिस्ताः । १९ ईर्याद्याः पञ्च । २० मनोगुप्त्याद्यास्तिस्रः ।

अनित्यताद्या भज भावनाः सदा यतस्व दुःसाध्यगुणेऽपि[1] संयमे ।
जिघत्सया ते त्वरते ह्ययं यमः श्रयन्प्रमादान्न भवाद्विभेषि किम् ॥ २१५ ॥
हंतं[2] मनस्ते कुविकल्पजालैर्वचोऽप्यवद्यैश्च वपुः प्रमादैः[3] ।
लब्धीश्च सिद्धीश्च तथापि वाञ्छन् मनोरथैरेव हहा हतोऽसि[4] ॥ २१६ ॥
मनोवशस्ते सुखदुःखसंगमो मनो मिलेद्यैस्तु तदात्मकं भवेत्[5] ।
प्रमादचोरैरिति वार्यतां मिलच्छीलांगमित्रैरनुपज्जर्यानिशम्[6] ॥ २१७ ॥
ध्रुवः प्रमादैर्भववारिधौ मुने तव प्रपातः परमत्सरः पुनः ।
गले निबद्धोरुशिलोपमोऽस्ति चेत् कथं तदोन्मज्जनमप्यवाप्स्यसि॥२१८॥
महर्षयः केऽपि[8] सहन्त्युदीर्याप्युग्रातपादीन्यदि निर्जरार्थम्[9] ।
कष्टं प्रसंगागतमप्यणीयोऽपीच्छन् शिवं किं सहसे न भिक्षो ॥ २१९ ॥
यो दानमानस्तुतिवन्दनादिभिर्न मोदतेऽन्यैर्न[12] तु दुर्मनायते ।
अलाभलाभादिपरीषहान् सहन्[13] यतिः स तत्त्वादपरो[14] विडम्बकः[15]॥२२०॥
दधद्गृहस्थेषु ममत्ववुद्धिं तदीयतां[16] या परितप्यमानः[17] ।
अनिर्वृतान्तःकरणः सदा स्वैस्तेषांच पापैर्भ्रमिता भवेऽसि ॥ २२१ ॥
त्यक्त्वा गृहं स्वं परगेहचिन्तातप्तस्य को नाम गुणस्तवर्षे[18] ।
आजीविकास्ते यतिवेषतोऽत्र[19] सुदुर्गतिः प्रेत्य तु दुर्निवारा ॥ २२२ ॥
कुर्वे न सावद्यमिति प्रतिज्ञां वदन्नकुर्वन्नपि देहमात्रात्[20] ।
शय्यादिकृत्येषु नुदन् गृहस्थान् हृदा गिरा वासि कथं मुमुक्षुः॥ २२३ ॥

---

१ अपिशब्दश्चार्थे । २ दग्धं मनो मे इति वा पूर्वार्द्धपाठः । ३ स्त्रीसेवाचिन्तनादिदुर्ध्यानसमूहैः । ४ अलीकभाषणादिभिः पापैः । ५ अष्टविधैः प्रमादैः । ६ विहन्ये इत्युत्तरार्द्धपाठः । ७ चित्ताधीना सुखदुःखप्राप्तिः । मनसः शुभाशुभव्यापारैः शुभाशुभकर्मबन्धस्तेन च सुखदुःखप्राप्तिरिति परंपरया मनोवशः सुखदुःखसंगमः । ८ संयोजय । अनुपंगय इति पाठान्तरम् । ९ अद्भुतचारित्राः । १० कर्मक्षयार्थम् । ११ आदिपदात् पादसंवाहनादिभिः । १२ तत्प्रतिपक्षभूतैरप्राप्तिकर्कराहननगालिप्रदानतिरस्कारादिभिः । १३ जयन् इति वा पाठः । १४ तत्त्वात् परमार्थतः । १५ तद्विपरीतलक्षणः पुमान् वेषमात्रधरणेन नटः । १६ ममायं भक्त इति मतिम् । १७ गृहस्थसुखदुःखचिन्तया । १८ रजोहरणादियतिलिंगधारणात् । १९ इह भवे । २० वापि इति वा पाठः ।

कथं महत्त्वाय ममत्ववतो वा सावद्यमिच्छस्यपि संवलोके ।
न हेममय्यप्युदरे हि शस्त्री शिला क्षिणोति क्षणतोऽप्यसून् किम् ॥ २२४ ॥
रंकः[1] कोऽपि जनाभिभूतिपदवीं त्यक्त्वा प्रसादाद्गुरो-
र्वेषं[2] प्राप्य यतेः कथञ्चन कियच्छास्त्रं पदं[3] कोऽपि च ।
मौर्खैर्यादिवशीकृतर्जुजनतादानार्चनैर्गर्वभा-
गात्मानं गणयन्नरेन्द्रमिव धिग् गन्ता द्रुतं दुर्गतौ[4] ॥ २२५ ॥
प्राप्यापि चारित्रमिदं दुरापं स्वदोषजैश्चेद्विषयप्रमादैः[5] ।
भवाम्बुधौ धिक् पतितोऽसि भिक्षो हतोऽसि दुःखैस्तदनन्तकालम् ॥२२६॥
कथंमपि समवाप्य बोधिरत्नं युगसमिलादिनिदर्शनाद्दुरापम्[6] ।
कुरु कुरु रिपुवश्यतामगच्छन् किमपि हितं लभसे यतोऽर्थितं शम्[7] ॥ २२७ ॥
द्विषस्त्विमे ते विषयप्रमादा असंवृता[8] मानसदेहवाचः ।
असंयमाः[9] सप्तदशापि हास्यादयश्च विभ्यच्चर[10] नित्यमेभ्यः ॥ २२८ ॥
गुरूनवाप्याप्यपहाय गेहं[11] मधीत्य शास्त्राण्यपि तत्ववांचि[12] ।
निर्वाहचिन्तादिभराद्यभावेऽप्यृषे न किं प्रेत्य हिताय यत्नः ॥ २२९ ॥
विराधितैः संयमं[13] सर्वयोगैः पतिष्यतस्ते भवदुःखराशौ ।
शास्त्राणि शिष्योपधिपुस्तकाद्या भक्ताश्च लोकाः शरणाय नालम् ॥ २३० ॥
यस्य क्षणोऽपि सुरधामसुखानि पल्यकोटीर्नृणां द्विनवतीं[14] ह्यधिकां ददाति ।
किं हारयस्यधम संयमजीवितं तत् हा हा प्रमत्त पुनरस्य कुतस्तवाप्तिः ॥२३१॥

---

१ गृहस्थावस्थाया कोऽपि रंक. । २ व्याकरणप्रमाणसिद्धान्तादिग्रन्थानां सूत्रमर्थञ्च । ३ पण्डितादिपदवीम् । ४ आदिपदात् सकपटवैराग्यमुद्रादिपरिग्रहः । ५ स्वकीयरागद्वेषलक्षणदोषजन्यैर्विषयप्रमादैः । ६ चातुर्गतिकैः । ७ कथंचित् कष्टसहनजनितकामनिर्जरादियोगात् । ८ जिनधर्मप्राप्तिरूपम् । ९ युगसमिलादिनिदर्शनानि परिशिष्टतो ज्ञेयानि । १० सुखसाधनम् । ११ हितसाधनात् । १२ अनुभवप्रत्यक्षा इमे विषयाश्च प्रमादाश्च । १३ संवररहिता मनोवाक्कायाः । १४ पृथिव्याद्यसंयमव्यापाराः । विस्तरस्तु परिशिष्टे द्रष्टव्यः । १५ हास्यरत्यरतिशोकभयजुगुप्सारूपा आभ्यन्तरारयः । १६ चर संयममार्गम् । १७ सकलसंगमूलमपि । १८ तत्वप्रतिपादकानि शास्त्राणि आचारांगादीनि । १९ अत्र आदिशब्दात् गृहव्यापारराज्यव्यापारयानपात्रव्यापारभरादिपरिग्रहः । २० संयमस्य सकलव्यापारैः समितिगुप्तिप्रभृतिभिः खण्डितैः । २१. ९२५९२५९२५८१ वर्षाणि यावत् ।

नाम्नापि यस्येति जनेऽसि पूज्यः शुद्धात्ततो नेष्टसुखानि कानि ।
तत्संयमेऽस्मिन् यतसे मुमुक्षोऽनुभूयमानोरुफलेऽपि किं न ॥ २३२ ॥

मिथ्यात्वादिनिरोधोपदेशाधिकारः ।

मिथ्यात्वयोगाविरतिप्रमादानात्मन् सदा संवृणु सौख्यमिच्छन् ।
असंवृता यद्भवतापमेते सुसंवृता मुक्तिरमाञ्च दद्युः ॥ २३३ ॥

मनः संवृणु हे विद्वन्नसंवृतमना यतः ।
याति तंदुलमत्स्यो द्राक् सप्तमीं नरकावनीम् ॥ २३४ ॥
प्रसन्नचन्द्रराजर्षेर्मनःप्रसरसंवरौ ।
नरकस्य शिवस्यापि हेतुभूतौ क्षणादपि ॥ २३५ ॥
मनोऽप्रवृत्तिमात्रेण ध्यानं नैकेन्द्रियादिषु ।
धर्म्यशुक्लमनःस्थैर्यभाजस्तु ध्यायिनः स्तुमः ॥ २३६ ॥
सार्थं निरर्थकं वा यन्मनः सद्धर्मानयन्त्रितम् ।
विरतं दुर्विकल्पेभ्यः पारगांस्तान् स्तुवे यतीन् ॥ २३७ ॥

---

१ मिथ्यात्वं—आभिग्राहिकं (पाखंडिनां स्वस्वशास्त्रनियंत्रितविवेकालोकानां परपक्षप्रतिक्षेपदक्षाणाम्) अनाभिग्राहिकं (प्राकृतजनानां, सर्वे देवा वन्द्या न निन्द्याः । एवं सर्वे गुरवः सर्वे धर्माश्चाराध्याः) आभिनिवेशिक (यथास्थितं वस्तु जानतोऽपि दुरभिनिवेशप्लावितधियः) सांशयिकं (देवगुरुधर्मेष्वयमय वेति संशयानस्य) अनाभोगिकञ्च (विचारशून्यस्य एकेन्द्रियादेर्विशेषज्ञानविकल्पस्य) योगाश्च शुभमनोवाक्कायव्यापाराः । २ दुष्टविषयेभ्यो निवर्तय । ३ महामत्स्यस्य चक्षुःपक्ष्मणि तण्डुलप्रमाणोऽतर्मुहूर्तायुरुपजायते। स प्रसुप्तमहामत्स्यस्य विकस्वरवदने जलोर्मिवशात् प्रविशतो निर्यतश्च बहून् मत्स्यान् वीक्ष्य तद्ग्रासाध्यवसायभृद् दुर्ध्यानदारुणपरिणामेन अन्तर्मुहूर्तेन सप्तमं नरकं गच्छति । ४ प्रसन्नचन्द्रराजर्षिकथा परिशिष्टे द्रष्टव्या । ५ चित्तप्रवृत्तिनिवृत्ती । ६ चेतसः प्रवृत्त्यभावमात्रेण संज्ञिपञ्चेन्द्रियातिरिक्तेषु प्राणिषु एकद्वित्रिचतुरिन्द्रियेषु मनोऽप्रवृत्तिरूपं ध्यानं योगांगं न भवति । प्रत्युत पवनसाधने मनोरोधस्य धर्म्यध्यानशुक्लध्यानान्तरायकारित्वादकिञ्चित्करत्वम् । ७ धर्म्यध्यानशुक्लध्यानाभ्यां मनःस्थैर्यं भजन्ति ये तान् । ८ येषां मनः । ९ सुध्यान इति वा पाठः । शुभकार्यकरणमनोरथेन नियंत्रितं । अत्र सार्थकता निरर्थकता च शुभकार्यकरणमनोरथे समुत्पन्ने तत्कार्यसिद्धौ सफलता तत्कार्यासिद्धौ च निष्फलता । उभयत्रापि शुभकार्यानुबन्धिता । "भवन्ति भूरिभिर्भाग्यैर्धर्मकर्ममनोरथाः । फलन्ति यत्पुनस्ते तु तत्सुवर्णस्य सौरभम् ॥" १० अशुभकार्यकरणमनोरथेभ्यो निवृत्तम् ।

वचोऽप्रवृत्तिमात्रेण मौनं के[1]के न बिभ्रते ।
निरवद्यं वचो येषां वचोगुप्तांस्तु[3] तान् स्तुवे ॥ २३८ ॥
निरवद्यं वचो ब्रूहि सावद्यवचनैर्यतः ।
प्रयाता नरकं घोरं वसुराजादयो द्रुतम् ॥ २३९ ॥
इहामुत्र च वैराय दुर्वाचो नरकाय च ।
अग्निदग्धाः प्ररोहन्ति दुर्वाग्दग्धा पुनर्न हि ॥ २४० ॥
अत एव जिना दीक्षाकालादाकेवलोद्भवम्[6] ।
अवद्यादिभिया[7] ब्रूयुर्ज्ञानत्रयभृतोऽपि न[8] ॥ २४१ ॥
कृपया संवृणुं[9] स्वांगं कूर्मा ज्ञातेनिदर्शनात्[12] ।
संवृतासंवृतांगा[13] यत् सुखदुःखान्यवाप्नुयुः[14] ॥ २४२ ॥
कायस्तम्भान्न के के स्युस्तरुस्तम्भादयो यताः[15] ।
शिवहेतुक्रियो येषां कायस्तांस्तु स्तुवे यतीन् ॥ २४३ ॥
श्रुतिसंयममात्रेण शब्दान् कान् के[16] त्यजन्ति[17] न ।
इष्टानिष्टेषु चैतेषु रागद्वेषौ त्यजन् मुनिः ॥ २४४ ॥
चक्षुःसंयममात्रात् के रूपालोकांस्त्यजन्ति न ।
इष्टानिष्टेषु चैतेषु रागद्वेषौ त्यजन् मुनिः ॥ २४५ ॥
घ्राणसंयममात्रेण गन्धान् कान् के त्यजन्ति न ।
इष्टानिष्टेषु चैतेषु रागद्वेषौ त्यजन् मुनिः ॥ २४६ ॥
जिह्वासंयममात्रेण रसान् कान् के त्यजन्ति न ।

---

१ एकेन्द्रियादयः । २ निष्पापम् । ३ वाग्गुप्तिधरान् । ४ वसुराजादिकथा परिशिष्टतोऽवगन्तव्या । ५ दुर्वाग्दग्धा जना न प्ररोहन्ति सौमनस्यरूपांकुरवन्तो भवन्ति । ६ दीक्षाकालात् व्रतप्रतिपत्तिसमयादारभ्य आकेवलोद्भवम् केवलज्ञानोत्पत्तिसमयं यावत् । ७ आदिपदात् धर्म्यध्यानविघातभिया । ८ मतिश्रुतावधिज्ञानवन्तोऽपि । ९ जीवदयालक्षणहेतुना । १० निरुंद्धि । ११ स्वकायं । १२ ज्ञाताधर्मकथांगोक्तदृष्टान्तात् । १३ संलीनासंलीनगात्राः कूर्माः । १४ प्राप्नुवन्ति । १५ संयमिनः । १६ एकेन्द्रियादयश्चतुरिन्द्रियान्ता अनेडमूकबधिरपञ्चेन्द्रियाश्च । १७ परिहरन्ति । १८ प्रीत्यप्रीतिलक्षणौ । १९ त्रीन्द्रियादयश्चक्षुर्दोषदुष्टपञ्चेन्द्रियाश्च । २० एकेन्द्रियद्वीन्द्रियत्रीन्द्रिया दोषग्रस्ताः पञ्चेन्द्रियाश्च ।

मनसा[1] त्यज तानिष्टान् यदीच्छसि तपःफलम् ॥ २४७ ॥
त्वचः संयममात्रेण स्पर्शान् कान् के त्यजन्ति न ।
इष्टानिष्टेषु चैतेषु रागद्वेषौ त्यजन् मुनिः ॥ २४८ ॥
वस्ति[3]संयममात्रेण ब्रह्म[4] के के न बिभ्रते ।
मनःसंयमतो धेहि[6] धीर चेत्तत्फलार्थ्यसि[7] ॥ २४९ ॥
विषयेन्द्रियसंयोगाभावात् के के न संयताः ।
रागद्वेषमनोयोगाभावाद्ये तु स्तवीमि तान् ॥ २५० ॥
कषायान् संवृणु[9] प्राज्ञ नरकं यदसंवरात् ।
महातपस्विनोऽप्यापुः करटोत्करटादयः[10] ॥ २५१ ॥
यस्यास्ति किञ्चिन्न तपोयमादि ब्रूयात्स यत्तत्तुदतां[11] परान् वा[12] ।
यस्यास्ति कष्टोत्तमिदं[13] तु किं न तद्भ्रंशभीः संवृणुते[14] स योगान् ॥ २५२ ॥
भवेत्समग्रेष्वपि संवरेषु परं निदानं शिवसंपदां यः ।
त्यजन् कषायादिजदुर्विकल्पान् कुर्यान्मनःसंवरमिद्ध[16]धीस्तम् ॥ २५३ ॥
तदेवमात्मा कृत[17]संवरः स्यात् निःसंगतां[18]भाक् सततं सुखेन[19] ।
निःसंगभावादथ संवरस्तद्द्वयं[20] शिवार्थी युगपद्भजेत ॥ २५४ ॥

शुभवृत्तिशिक्षोपदेशाधिकारः ।

आवश्यकेष्वातनु[22] यत्नमाप्तोदितेषु[23] शुद्धेषु[24] तमोपहेषु[25] ।

---

१ समतापरिणामपरिणतचेतसा। २ मोक्षम् । ३ केवलमूत्रागमनिरोधेन । ४ ब्रह्मव्रत । ५ कृत्रिमनपुंसकीकृतनरतुरगबलीवर्दादयो नारकाः संमूर्च्छिमाश्च । ६ ब्रह्मधेहि । धारयेत्यर्थः । ७ ब्रह्मचर्यफलं मोक्षः तदर्थी । ८ क्षयोपशमेन अनुदयावस्थान् कुरु । ९ करटोत्करटादिकथा पारिशिष्टेऽवलोकनीया । १० वदतु । ११ सावद्यं निरर्थकं वा । १२ अशुभमनोवाक्कायव्ययोगादिना व्यर्थां जनयतु । १३ अथवा । १४ बहुप्रयासप्राप्तं तपःसंयमादिमुक्त्वा । १५ किं न संवृणुते कथं न नियन्त्रयति । १६ समृद्धबुद्धिः पुमान् । तं मनःसंवरम् । १७ निष्पादितसकलकषायव्ययोगनिरोधः । १८ पुत्रकलत्रादिममताराहित्यवान् । १९ अनायासेन । २० संव्रियन्ते निवार्यन्ते समागच्छन्ति कर्माणि यस्मात् स संवरः । २१ निःसंगतासंवरलक्षणं द्वयम् । २२ प्रतिदिनानुष्ठेयषडावश्यकप्रवृत्तिषु । सामायिकचतुर्विंशतिस्तववंदनकप्रतिक्रमणकायोत्सर्गप्रत्याख्यानाख्येषु नित्यकर्तव्येषु । २३ भगवत्प्रतिपादितेषु । २४ निर्दोषेषु सामायिकादिविषयकदोषरहितेषु । २५ पुराकृतपापहरेषु ।

न हन्त्यमुक्तं न चाप्यशुद्धं वैद्योक्तमप्यौषधमामयापहम् ॥ २५५ ॥
तपांसि तन्याद्विविधानि नित्यं मुखे कटून्यायतिसुन्दराणि ।
विघ्नन्ति तान्येव कुकर्मराशिं रसायनानीव दुरामयान् यत् ॥ २५६ ॥
विशुद्धशीलांगसहस्रधारी भवानिशं निर्मितयोगसिद्धिः ।
सहोपसर्गांस्तनुनिर्ममः सन् भजस्व गुप्तीः समितीश्च सम्यक् ॥ २५७ ॥
स्वाध्याययोगेषु दधस्व यत्नं मध्यस्थवृत्त्यानुसरागमार्थान् ।
अगौरवो भैक्ष्यमटाविषादी हेतौ विशुद्धे वशितेन्द्रियौघः ॥ २५८ ॥
दधस्व धर्मार्थितयैव धर्म्यान् सदोपदेशान् स्वपरादिसाम्यान् ।
जगद्धितैषी नवभिश्च कल्पैर्ग्रामे कुले वा विहराप्रमत्तः ॥ २५९ ॥
कृताकृतं स्वस्य तपोजपादि शक्तीरशक्तीः सुकृतेतरे च ।
सदा समीक्षस्व हृदाथ साध्ये यतस्व हेयं त्यज चार्य्यार्थी ॥ २६० ॥

---

१ सदोपम् । २ करणकालस्यादौ कटूनि क्षुत्पिपासादिसहनजनितदुःखोत्पादकत्वेन कटुकरसानि । ३ करणकालादुत्तरकाले । तपोजनितशुभकर्मानुभवकाले । सुंदराणि आनन्ददायकानि । ४ विशुद्ध निरतिचारं शीलमाचारो ब्रह्मचर्यरूपं तस्यांगानि कारणानि तेषां सहस्र धारयतीति । ५ निर्मिता निष्ठां नीता योगस्य मनोवाक्कायैकाग्र्यस्य ज्ञानदर्शनचारित्रसंनिपातलक्षणस्य वा योगानां वा प्राणायामादीनां सिद्धिर्निष्पत्तिर्येन स तथा । ६ सह क्षमस्व । ७ क्षुत्पिपासादीन् । ८ शरीरममतारहितः । ९ सेवस्व । १० योगाश्चोद्देशसमुद्देशानुज्ञादिरूपानुष्ठानविशेषाः । ११ रागद्वेषराहित्येन । १२ आगमार्थानुसारेण विचर । १३ ऋद्धिगारवरसगारवसातागारवरहितः सन् । "आच्च गौरवे" ८.१.१६३ औतः आत्वं अउश्च भवति--गारवं गउरव इति प्राकृतसिद्धहेमचन्द्रशब्दानुशासने श्रीहेमचन्द्रसूरिः । १४ भिक्षाकर्म कुर्वन् अट भ्रम । १५ श्रमरहितः सन् । १६ निर्दोषे हेतौ मोक्षकारणे ज्ञानदर्शनचारित्रलक्षणे । वशितेन्द्रियौघः जितेन्द्रियवर्गः । १७ धर्मः पुण्य स एवार्थो यस्य स तस्य भावस्तया । अत्र एवकारेण न तु वस्त्राहाराद्यर्थितया इत्यन्ययोगव्यवच्छेदः । १८ स्वश्चात्मा सुहृद्वा अपरश्चात्मव्यतिरिक्तः शत्रुर्वा । स्वपरौ आदौ येषां ते स्वपरादयः तेषां साम्य समभावः प्रतिपाद्यं येषु तान् समतारसप्रतिपादकान् । आदिपदात् अहिहारकुसुमशय्याशिलातलमणिलोष्टतृणवस्त्रैणादिपरिग्रहः । "स्वपरादिसाम्यात्" इति पाठे तु स्वपरप्रमुखश्रोतृषु रागद्वेषराहित्येन समताभावात् । १९ नवभिः कल्पैः साध्वाचारैः । ऋतुबद्धकालेऽष्टौ मासकल्पाः । चतुर्मासककाले एकश्चतुर्मासकल्पः । २० उपलक्षणत्वात् जनपदनगराकरादौ वा शक्त्यभावे कुले उग्रकुलभोगकुलराजन्यकुलक्षत्रियकुललक्षणे भिक्षमाणो विचर । २१ सुकृतं पुण्य इतरत् च पापम् । २२ मोक्षार्थी ।

परस्य पीडापरिवर्जनात्ते त्रिधा त्रियोग्यप्यमला सदास्तु ।
साम्यैकलीनं गतदुर्विकल्पं मनो वचश्चाप्यनघप्रवृत्ति ॥ २६१ ॥
मैत्रीं प्रमोदं करुणां च सम्यक् मध्यस्थतां चानय सात्म्यमात्मन् ।
सद्भावनार्द्रात्मतलयं प्रयत्नात् कृत्वाविरामं रमयस्व चेतः ॥ २६२ ॥
कुर्या न कुत्रापि ममत्वभावं न च प्रभो रत्यरती कषायान् ।
इहापि सौख्यं लभसेऽप्यनीहो ह्यनुत्तरं मन्यसुखाभमात्मन् ॥ २६३ ॥

इति यतिवरशिक्षां योऽवधार्य व्रतस्थ-
श्चरणकरणयोगानेकचित्तः श्रयेत ।
सपदि भवमहाब्धिं क्लेशराशिं स तीर्त्वा
विलसति शिवसौख्यानन्यसायुज्यमाप्य ॥ २६४ ॥

(ग्रन्थोपसंहारः)

साम्यसर्वस्वाधिकारः ।

एवं सदाभ्यासवशेन सौख्यं नयस्व साम्यं परमार्थवेदिन् ।
यतः करस्थाः शिवसम्पदस्ते भवन्ति सद्यो भवभीतिभेत्तुः ॥ २६५ ॥

---

१ करणकारणानुमतिलक्षणप्रकारत्रयेण । २ मनोवचःकायलक्षणयोगत्रयी । ३ निरवद्यव्यापारम् । मनोवचःशुद्धेरपेक्षया कायशुद्धिः सुखसाध्या इति हेतोरत्र न कथिता । ४ गुरुक्तयुक्त्या शास्त्रोक्तयुक्त्या वा । ५ आत्मना सह एकीभावम् । आनय प्रापय । ६ संप्राप्ततन्मयस्वभावं यथा स्यात्तथा । स्वात्मलयं इति वा पाठः । ७ निरन्तरं यथा स्यात्तथा । ८ ना विदग्धाः । ९ शय्योपधिपुस्तकादिवस्तुनि मत्वभावं ममेतिबुद्धिलक्षणां ममताम् । १० हे आत्मन् प्रभो । ११ रतिश्च सुन्दरवस्तुवाञ्छितिलक्षणेषु विषयेषु मोहनीयोदयाच्चित्ताभिरतिर्वा । अरतिश्चासुन्दरवस्तुनि प्रद्वेषलक्षणा अनिष्टविषयेषु मोहनीयोदयाच्चित्तोद्वेगो वा । १२ मर्त्यलोके । १३ निःस्पृहः । १४ अनुत्तरविमानवासिसुरानुभवयोग्य सुरसदृशं सौख्यं । ममतादिदोषरहितस्य साधोरिहापि सर्वातिशायि सुखं भवति इति भावः । १५ साधुः । इति अमुना प्रकारेणोक्ताम् । १६ चरणसमितिकरणसमितिलक्षणान् योगान् संयमव्यापारान् । एकचित्तस्तदेकाग्रमनाः । १७ जन्मजरामरणक्षुत्पिपासापरिभवादिलक्षणाना राशिं भवमहाब्धिम् तीर्त्वा निस्तीर्य । १८ शिवसौख्यस्य मोक्षसुखस्य आनन्त्यमविनाशिता तया सह सायुज्यं साहित्यं । सह युग् योगोऽस्येति सयुग् तस्य भावः सायुज्यम् । १९ एव पञ्चदशद्वारोक्तप्रकारेण । २० पुनः पुनः करणलक्षणाभ्यासायत्तता-योगेन । २१ स्वात्मप्रकृत्या सह एकीभाव नयस्व ममताम् । २२ हे तात्त्विकपदार्थज्ञ ।

त्वमेव दुःखं[1] नरकस्त्वमेव[2] त्वमेव शर्मापि[3] शिवं त्वमेव[4] ।
त्वमेव कर्माणि[5] मनस्त्वमेव[6] जहीह्यविद्यामवधेहि[7] चात्मन् ॥ २६६ ॥
निःसंगतामेहि[8] सदा तदात्मन्नर्थेष्वशेषेष्वपि[9] साम्यभावात्[10] ।
अवेहि विद्वन् ममतैव मूलं[11] शुचां, सुखानां समतैव चेति ॥ २६७ ॥
स्त्रीषु धूलिषु निजे च परे[12] वा सम्पदि[13] प्रसरदापदि[14] चात्मन्[15] ।
तत्त्वमेहि समतां ममतामुग्[16] येन शाश्वतसुखाद्वयमेषि[17] ॥ २६८ ॥
तमेव सेवस्व गुरुं प्रयत्नादधीष्व शास्त्राण्यपि तानि विद्वन्[18] ।
तदेव तत्त्वं परिभावयात्मन्[19] येभ्यो भवेत्साम्यसुधोपभोगः ॥ २६९ ॥
समग्रसच्छास्त्रमहार्णवेभ्यः समुद्धृतः साम्यसुधारसोऽयम्[20] ।
निपीयतां[21] हे विबुधा लभेध्वमिहापि[22] मुक्तेः सुखवर्णिकां[23] यत्[24] ॥ २७० ॥
शान्तरसभावनात्मा मुनिसुन्दरसूरिभिः कृतो ग्रन्थः[25] ।
ब्रह्मस्पृहया[26] ध्येयः स्वपरहितोऽध्यात्मकल्पतरुरेषः[27] ॥ २७१ ॥
इममिति मतिमानधीत्य चित्ते रमयति[28] यो विरमत्ययं भवाद्राक्[29] ।
स च नियतमतो रमेत[30] चास्मिन् सह भववैरिजयश्रियाँ[31] शिवश्रीः ॥ २७२ ॥

इति श्रीशान्तरसभावनात्मस्वरूपोऽध्यात्मकल्पद्रुमो जयश्र्यंकः श्रीमुनिसुन्दरसूरिभिर्विरचितः समाप्तः ॥

---

१ दुःख प्रतिकूलवेद्य त्वमेवासि दुःखसाधनोपायप्रेरकत्वात् । २ निरयनाम्नी दुर्गतिस्त्वमेवासि नरकगतिनामकर्मार्जकत्वात् । ३ शर्म सुखमसि सुखसाधनोपायप्रेरकत्वात् । ४ मोक्षोऽसि सकलकर्मराहित्येन जायमानत्वात् । ५ शुभाशुभरूपाणि त्वमेवासि शुभाशुभकर्मार्जकत्वात् । ६ शुभाशुभकर्मबन्धकश्चेतोव्यापारस्त्वमेवासि मनोव्यापारकत्वात् । ७ अर्थवैपरीत्यलक्षणां । मिथ्याज्ञान ममाय सुखदो ममायं दुःखद इत्यादिरूपां मिथ्यावासनां वा । ८ यथा सुख भवति दुःखं च न भवति तथा सावधानो भव । ९ नवविधपरिग्रहे ममताराहित्यम् । १० प्राप्नुहि । ११ सुखदुःखजनकेषु पदार्थेषु । १२ स्वजने । १३ परजने वैरिणि वा । १४ राज्यादिसमृद्धौ । १५ आगच्छद्विपत्तौ । १६ इष्टानिष्टवस्तुषु ममत्वत्यजनशीलः । १७ शाश्वतसुखेन मोक्षसुखेन सह अद्वयमैक्यम् । १८ अत्यादरेण श्रूयताम् । १९ मनुष्यभवे स्थिता अपि । २० सौख्यस्य वर्णिकां तत्स्वरूपसूचकस्तदेकदेशस्ताम् । २१ शान्तरसभावनस्वरूपः । २२ मुक्तिकामनया । २३ पुनः पुनरनुभवति । २४ संसाराद्विवर्तते । २५ अतः अस्माद्भवविरमणात् । २६ ग्रन्थाध्ययनानुभवितरि पुसि । २७ अत्र जयश्रियेत्यनेन ग्रन्थस्यास्य जयश्र्यकता दर्शिता ।

अध्यात्मकल्पद्रुमाचें

परिशिष्ट.

(अकारादि अनुक्रमानें)

अजागलकर्तरीय न्यायः—एक खाटिक एका बकरीला वधस्थानीं घेऊन गेला आणि तिच्या मानेवर सुरी ठेवणार तो त्याला अचिंतित घरांत जाण्याचें कारण पडलें. त्यामुळें सुरी तेथेंच टाकून तो घरांत गेला. इकडे बकरीनें ती सुरी लपवून ठेवण्यासाठीं पायांनीं जमीन खणली व त्या खळग्यांत तिनें सुरी ढकलली ती त्यांत उभी पडली. तीवर पायांनीं माती ढकलून बकरी वसावयास गेली तेव्हां तिची मान सुरीचे टोंकावरच पडली आणि ती तत्काल मरण पावली. प्रसंगविशेषीं स्वतःची क्रिया स्वतःलाच घातक होते हें सुचविलें आहे. श्लो. १८१ पहा.

अजीवः—षड्द्रव्य शब्दावरील टीप पहा.

अभिग्रहः—द्रव्य, क्षेत्र, काल व भाव यांच्या योगानें चार प्रकारांचा.

अव्रतेंः—जीवहिंसा, मृषावाद, अदत्तादान, मैथुन व परिग्रह हे अव्रताचे प्रकार.

चार गतींचीं निबंधनकर्में ज्याच्या योगानें सर्व बाजूंनीं एकत्र होतात त्यास परिग्रह ही सज्ञा आहे.

अविरतिः—पांच इंद्रियांना स्वस्व विषयांत यथेच्छ प्रवर्तविणें, पापमय वस्तूपासून मनाला न आवरणें, व सहा जीवनिकायांच्या हिंसेंत प्रवृत्त होणें, हे अविरतीचे बारा प्रकार.

अष्टकर्माणि अथवा प्रकृतयः—(१) **ज्ञानावरणीयकर्म** [श्रुतमतिज्ञानादि पंचविध ज्ञानाचें आवरण करणारें कर्म.]

(२) **अंतरायकर्म** [ज्याचे योगानें जीवाला लाभादिकाची प्राप्ति होत नाहीं.] —त्याचे प्रकारः—दानांतराय, लाभांतराय, भोगांतराय, उपभोगांतराय, व वीर्यांतराय.

(३) **दर्शनावरणीयकर्म** [सामान्य अवबोधाला दर्शन ह्मणतात. त्याला

आवृत करणारें कर्म] त्याचे प्रकार:—चक्षुर्दर्शनावरणीय, अचक्षुर्दर्शनावरणीय (अचक्षु चक्षु शिवाय इतर चार इंद्रियें व मन), अवधिदर्शनावरणीय (रूपिद्रव्याचें मर्यादापूर्वक ज्ञान तें अवधिदर्शन), केवल दर्शनावरणीय व पांच प्रकारांची निद्रा.

